Chap-6

# षष्ठः परिच्छेदः

## क-रससिद्धान्तस्य दार्शनिकं विवेचनम्---

मनः आस्वादयति रसम्, तत् कलाकृतेर्गम्भीरतमेषु तलेषु अवगाहते। यादृशं यावच्च गाम्भीर्यं कृत्यामस्ति तादृशं तावच्च गाम्भीर्यं प्रेक्षकस्य मनस्यपि शोभते। मनसः कृतिमत्वं, कृतेश्च मनोमयत्वमेव रसास्वादनस्य रहस्यमस्ति। सारांशोऽयं प्रेक्षकस्य समग्रमपि जीवनं, चेतनेन्द्रियाणि शरीरं च यदा कलाकृतिं तन्मयत्वेन गृह्णन्ति तदा रसोऽनुभूयते। रसोऽस्ति पूर्णोऽनुभवः। सः पूर्णमानवस्याभिव्यक्त्यामेव प्राप्तो भवितुमर्हति।

रसदशेति हृदयस्य मुक्तावस्थायाः नाम।1 इत्याचार्यशुक्लमतम्। तद्व्याख्ययाऽत्र मुख्यतया तिस्रो धारणा निहिता भवन्ति। वैयक्तिकरागद्वेषतत्परिणामसुखदुःखनिर्मुक्तिरित्येका। चित्तवैशद्यमिति द्वितीया। भावनासाधारणीकरणतज्जन्यनैतिकपरितोषविति तृतीया। वस्तुतस्तु यथान्यत्र स्पष्टीकृतम्–शुक्लमतमिदं तावदरस्तूक्तविरेचनसिद्धान्तेन प्रभावितं वरीवर्ति। अरस्तूक्तविरेचनसिद्धान्तस्य द्वौ प्रमुखौ पक्षौ स्तः–मनोवैज्ञानिकनैतिकभेदात्। मनोवैज्ञानिकदृशाऽऽदेशनिर्गमनात्परं चित्तवैशद्यं विरेचनपदार्थः, नैतिकदृशा च मानसिकं स्वास्थ्यम्। डाक्टररिचर्ड्सः वर्तमानमनोविज्ञानप्रकाशेऽस्यैव प्रेरणया सिद्धान्तमिमं प्रत्यपीपदत्। अन्तःकारणवृत्तिसामञ्जस्ये चित्तवैशद्ये, हृदयस्य मुक्तावस्थायाञ्च नास्ति तत्वतो भेदः। अन्तःकरणवृत्तिसामञ्जस्यं नियमेन चित्तं विशदीकरोति। हृदयं रागद्वेषादिविकारेभ्यो विमोच्य प्रकृतिस्थं करोतीति नास्ति सन्देहः इदं वोच्यताम्-चित्तस्य प्रकृतिस्थीभवनं नाम विभिन्नान्तर्वृत्तिपरस्परसमञ्जनम्। सूक्ष्मविश्लेषणे चैव प्रतीयते यद् वैशद्यस्य मुक्तावस्थायाश्च विकाराभाव एवार्थः। मुक्तावस्था विकाराणामभावात्मिका स्थितिः, वैशद्यञ्चान्तर्वृत्तिसामञ्जस्यस्य भावात्मिका स्थितिरिति भावः। प्रथमा चित्तस्य निर्विकारा निरोगा वा स्थितिः, अपरा तु तस्य स्वस्थावस्था। परमित्थं कदाचिच्छब्दक्रीडेव मा भूत्। व्यवहारे हि आरोग्यस्वास्थ्ययोरन्तरकरणमतिदुष्करम्। आम्, शुक्लस्य नैतिककल्पना नूनमग्रेपदार्पणम्। तस्येयं स्थापना नूनं भावात्मकतरा धनात्मकतरा च जायते, यदिह व्यक्तिगतेषु शोकमोहादिषु यत्र मोहजन्यं मालिन्यं भवति तत्र व्यक्तिगतात् सङ्कुचितादावर्ताद् बहिर्लोकमंगलप्रेरितास्त एव भावाः केनापि लोकोत्तरेण सौन्दर्येण विभूष्यन्ते। अथात्र प्रष्टव्यम्। किमियं स्थितिरिमा वा स्थितयो निरानन्दाः सन्ति। न तथेत्यहं

मन्ये। एवंविधा स्थितिर्हि आनन्दभूमिकेति, आनन्दभावरूपा वेति शक्यते मन्तुम्। आनन्दाप्लावितमात्मभोगं सा मा गात्, परमात्मविश्रान्तेः सा कदाचिद् द्रवीयस्यपि नास्ति। रिचर्ड्सः स्वसामञ्जस्यकल्पनायामन्तर्वृत्तीनां न्यूनतरक्षयस्याधिकतरपरितोषस्य च सम्भावनां समावेशयति। शुक्लश्च तत्र लोकमंगलसौन्दर्योद्भावनाबलादभावात्मकतामपि भूयः परिहर्तुं प्रयतते। परं स्वमान्यतानां पूर्वग्रहेण उभावपि न केवलमानन्दशब्दं पर्यहरताम्, अपि तु तदर्थमपि न्यषेधताम्। तथापि यथा निवेदितमाभ्यामाचार्याभ्यां निर्दिष्टा मनः स्थितिः हृदयस्य मुक्तावस्था अन्तर्वृत्तिसमाहितिश्चैव, न खलु सा निरानन्दतया स्वीकरणीया, प्रत्यक्षे किं प्रमाणम्।

अतोऽत्रेदमेव निष्कृष्यते यदसस्यानन्दरूपतां प्रति प्रस्तुताः सर्वे विकल्पा असिद्धा वा भवन्ति, प्रकारान्तरणानन्दमेव वा संकेतयन्ति।

इति शास्त्रार्थप्रपञ्चं विमुञ्चन् करुणाकाव्यप्रसंगविशेषास्वादविश्लेषणेन प्रस्तुतस्य प्रश्नस्य समाधानमतिसमीचीनं मन्ये। 'सत्यहरिश्चन्द्र' नाम्नि नाटके रोहितमृत्यौ शैव्याविलापः प्रसक्तः। कविरतिमार्मिकरीत्या रोहितस्याकालिकं मृत्युं तच्छोकसन्तप्तशैव्यार्त्तक्रन्दनं चोपवर्णयति। सूत्रधारश्च बालनटनटीगताभिनयकौशलेन नाट्योपकरणान्तरसहकृतेनातिसजीवतया तदुपस्थापयति। प्रेक्षागृहं गतः सामाजिकः प्रसंगमिमं साक्षात्करोति। कीदृशोऽयमनुभवः? इत्येवास्माकं विवेचनीयो विषयः। अत्र प्रसंगे प्रथमतः सामाजिकस्य मनः सामा येन प्रकृतिस्थम्, जीवनगतरागद्वेषहर्षविषादविनिर्मुक्तात्मा स किलोच्चतरानुभवं प्रत्युन्मुखीभूयात्र समागतः, समागच्छेद्वा। प्रेक्षागृहगतानि नाट्यप्रसाधनानि कल्पनां प्रबोध्य व्यावहारिकजीवनसंसर्गान्मुक्तौ तस्य साह्यं कुर्वन्ति। तथापि रंगमञ्चे स यावत्सर्पदंशेन मुग्धराजकुमारस्य करुणं मरणं प्रेक्षते तावन्नियमेन तन्मनसि शोकः समुदेति, क्लेशञ्च कञ्चनैषोऽनुभवति। इयं विपन्न सर्वथा व्यक्तिगतेति सत्यम्। तथापि परकीयस्यापत्यस्याप्येवंविधं मृत्युं पश्यताम्-स्माकं शोकः एवेदेति भवति तत्र मात्राभेदः, किन्त्वनुभूयते तु शोक एव। नेदं सर्वं यथार्थमिति वयं जानीमः, परं तत्क्षणं तथ्यमिदं विस्मरामः। कविकौशलं नटपाटवं चास्मान् विवशीकुरुतस्तद् विस्मर्तुम्। तथापि नेदं सकलं केवलं यथार्थम्, अपि तु रमणीयेन कल्पनावरणेनावेष्टितम्। अतः केवलयथार्थघटनाघाततीव्रताऽत्र न वर्तते। अयमाघातो नियमेन वास्तविकाघातस्मान्मृदुतरः। किन्तु प्रस्तुतकाव्यप्रसंगस्य किमयमेवास्वादः। किं नाम प्रेक्षकोऽनेन मृदुतरेणापि शोकाघातेन सन्तप्यैव तृप्यति। न कश्चिदपि विपश्चिदपिदं मन्येत, यद् वर्षसहस्रेभ्यः प्रेक्षकवर्गः सन्तापं भोक्तुं काव्यमिदमधीते, नाटकं वेदं प्रेक्षत इति। अतो माननीयमेव यदिह तात्कालिकः क्लेशो न काव्यास्वादः करुणरसास्वादो वा, प्रत्युत परिपाकप्रक्रियाया इदमंगमात्रमेकम्। अयं क्लेशो रामचन्द्रगुणचन्द्राभ्यां रामचन्द्रशुक्लेन चोल्लिखितस्तात्कालिकोऽनुभव एव,न तु

परिणतिः। प्रतिसफलकृति अध्ययनात्प्रेक्षणाद्वा परं सहृदयोऽनिवार्यतया कमपि मनः प्रसादमात्मपरितोषं वानुभवति। अयं मनः प्रसादो हसतो, दन्तान् वा दर्शयतः सामाजिकस्य प्रेक्षागृहान्निर्गमनं न वक्ति यथा शुक्लेनोक्तम्। कलाकृतिर्यावदुदात्ता गम्भीरा च स्यात् प्रेक्षकस्तावन्तमेव गंभीरमात्मपरितोषं ततः प्राप्नुयात्। परमात्मपरितोषस्थाने यदि तस्य शोकः क्षोभो वा जायते स च कुण्ठितः सन् निवर्तते, तदा स्वीकरणीयमेव यत्क्वचित्कश्चूकनास्त्येव प्रमादः। कविर्वा स्वसामग्र्या (उपादानस्य) प्रस्तुतः करुणात्रासादेः कलात्मिकायां परिणतावकुशलः, स करुणात्रासयोः प्रसतुतां केवलतां परिहर्तुं न प्राभवत्, सहृदयो वा मनसः केनचिदुत्कटेन पूर्वग्रहेण ग्रस्तोऽभूदिति। करुणात्रासयोः परिणतिर्मनःप्रसादे वाऽऽत्मपरितोषे वा कथं भवतीति प्रश्नो नात्र प्रस्तुतः, यथावसरं तं समाधास्यामः। इदानीं तावदेतावदेव ज्ञातव्यम्—यद्रसप्रक्रियायां सहृदयमनो नानावस्थाभ्यो निर्गत्याग्रेसरति, स्थायिभावानुरूपे सुखदुःखे सोऽनुभवति। कल्पनाप्रबोधेन तत्र काचित्स्वाच्छन्द्यभावना समुदेति। अपरतश्च कलातत्वानुभूतिः सामञ्जस्याहूलादविस्मयादीन् जनयति, अन्ते चैषां समेषामपि परिणतिः कस्मिंश्चिन्मनोदशाविशेषे भवति, यो नूनं परितोषप्रदः। कलात्मकस्य सर्जनस्य प्रक्रिया किल समञ्जनप्रक्रिया। करुणप्रसंगा स्वादनेन सहृदयचित्तवृत्तिः शोकत्रासाद्यनुभवेन क्षणं विक्षुभ्यापयन्ततःसमञ्जिता भवति, चित्तवृत्तिसमञ्जनं चेदं नियमेन सुखदा स्थितिः। एवं करुणरसस्यास्वादो न शोकत्रासाद्यास्वादः, अपि तु तेषां कलात्मिकायाः परिणतेरास्वादः आस्वादनस्य चास्यां प्रक्रियायां सहृदयः किञ्चित्कटुकमप्यनुभवति परं परिणतिरात्मपरितोषे सुखे एव वा भवति।

अतो रसानुभूतिः प्रीतिकर्यैव, आनन्दमयी चेतनैव सा, तत्र विवादः शाब्दिक एव न तात्विकः।किन्त्वानन्दस्यापि नैके स्तरा अनेकानि च रूपाणि भवन्ति तत्र रसानन्दः किंस्वरूप इति स्फुटीक्रियते तावद्रसस्वरूपव्याख्यानमपूर्णमेव स्यात्।भारतीयाः सर्वेऽपि प्राचीना अनेके चाधुनिका आचार्याः तत्र च पाश्चात्या अपि नैके मनीषिणो रसं कस्यचिल्लोकोत्तरस्यानन्दस्यानुभूतिं मन्यन्ते प्राचीनास्त्वाचार्या रसस्य लोकोत्तरतां साग्रहमरं प्रबलैस्तर्कैरतन्वन्। अयं तन्मतसारांशः—लौकिकाः भावास्तद्विषयाश्च काव्योपनिबद्धाः सन्तः कारणकार्यसम्बन्धाद्विमुक्ता भवन्ति, नश्यति च तेषां लौकिकत्वम्। अलौकिकस्य विषयस्यास्वादत्वेन रसोऽयं स्वयमप्यलौकिक एव भवति,। स स्मृत्यनुमानप्रत्यक्षानुभवादिभिन्नः, न कार्यो न ज्ञाप्यः, न सविकल्पकज्ञानेन ग्राह्यो नापि निर्विकल्पकज्ञानेन।

अनेके पाश्चात्या अपि विपश्चितः प्रातिस्विकेन विधिना प्रायस्तथ्यमिदमेवावर्त्तयन्ति—

'वास्तविकस्य जगतोऽंगत्वमनुकृतित्वं वा न काव्यरसप्रकृतिः काव्यं हि नाम विलक्षणं जगत्, आत्मनि स्वतन्त्र पूर्ण स्वायत्तञ्चेति।

अतः कस्याश्चिदपि कलाकृते रसमास्वादयितुं जीवनात्मिमपि समानेतव्यं न भवति। तस्य धारणा कार्यकलापो वा न वेदितव्यः, मनोवेगा अपि न परिचेतव्याः। अस्मिन् सन्दर्भे रिचर्ड्सो मन्यते यदस्या धारणायाः प्रभवः काव्यग्रन्थः। अनन्तरं तदाधारेण हीगेलः सौन्दर्यस्य सम्बन्धमात्मवादेन सहातिष्ठिपत्। परवर्तिभिर्विचारकैः क्रोचेवर्ननलीब्रैडलेवोसान्केक्लाइववैलादिभिस्तु सौन्दर्यानुभूतेर्विशिष्टस्य स्वरूपस्य काचित्सुनिश्चिता प्रकल्पनैव पुरस्कृता- विलक्षणा विशिष्टा च भवति सौन्दर्यानुभूतिरिति। तत्र कांटहीग्लौ विशिष्टमिममनुभवमानन्दात्मकं मन्येते, परं परवर्तिनः समालोचका नवोत्साहेनानन्दमस्यानुभवस्य विधिमात्रममन्यन्त, इममनुभवं वाऽऽनन्दादपि विलक्षणम्। अनयोर्वैलक्षण्यवैशिष्ट्योरयमाधारो यत्सौन्दर्यस्यानुभूतिस्तटस्थपरोक्षाव्यक्तिगतसाधारणीकृतबौद्धिकैन्द्रियरागात्मिकाभ्यः सर्वाभ्योऽनुभूतिभ्यो भिन्ना भवति। इत्थमस्य सिद्धान्तस्योत्साहिनः प्रवर्तकाः काव्यानुभूतिं वस्तुतो लौकिक्या आध्यात्मिक्याश्चोभयविधाया अप्यनुभूतेर्भिन्नां मन्यन्ते।

इदं विवेचनप्रकाशे स्फुटीभवत्येतद् यदलौकिकविशिष्टविलक्षणादीनां विशेषण शब्दानां समान एव प्रायो भावार्थः। रसः काव्यानुभूतिर्वा जीवनगताभ्योऽन्याभ्योऽनुभूतिभ्यो भिन्ना भवति। नेयं बौद्धिक्यनुभूतिः, न प्रत्यक्षा नाप्रत्यक्षा नैन्द्रियगता नापि रागात्मिका। व्यक्तिगतरागद्वेषनिर्मुक्ता, व्यक्तिचेतनासीमातीता, साधारणीकृतानुभूतिरियम्। अन्या हि जीवनगता अनुभूतयः प्रायेणैतत्कोटिनिविष्टा भवन्ति, ता हि वैयक्तिकं रागद्वेषलिप्ताः मनीषिणोऽस्यां अनिर्वचनीयतां वदन्तो वचनान्मुक्ताः, पाश्चात्यास्तु विचारकाः, काञ्चिन्नवीनां सौन्दर्यभावनामचीक्लृपन्।

स्थूलमिदं विभाजनं नात्यन्तिकम्। ऐन्द्रियी बौद्धिकी वानुभूतिर्हि न सम्भवति विनाध्यात्मिकीम्। तथैवाध्यात्मिकी, बौद्धिकी वा कथमैन्द्रियानुभूतिनिरपेक्षा स्यात्। ऋते हि बुद्धिसाहाय्यं किंञ्चिदिन्द्रियमात्मा वा कथं क्रियाशीलीभवितुमर्हति। अतएवेदं विभाजनं तस्यां तस्यामनुभूतौ तस्य तस्य तत्वस्य प्राधान्यं द्योतयति। नहि किञ्चिदप्यनुभूतिरूपं मानसः शास्त्रीयाप्रश्नसमाधानानन्दो बौद्धिकः, आत्मसाक्षात्कारानन्दश्चवाध्यात्मिकः।

अथायं काव्यानन्दः कुत्रचित्समाविशति, कुत्रचिदपि न समाविशति वेति विवेचनीयम्। अयं हि सर्वथा निरपेक्षो विलक्षणश्च। भूयोभिः संस्कृतसाहित्याचार्यैरलौकिकोऽयम्, अनिर्वचनीयोऽयमित्युक्तवास्य वैलक्षण्यमवश्य प्रतिपादितम्। परं तैरस्य स्वरूपविश्लेषणे प्रयासो नादृत इति नाभिसन्धिः। रसस्वरूपनिरूपणप्रकरणे स्फुटतयेदमुक्तमस्माभिः यदिह भारतीये काव्यशास्त्रे

काव्यास्वादविषये मतद्वयी प्राप्यते। भौतिकवादः, आत्मवादश्चेति। प्राचीनेषु भरतलोल्लटयोः परवर्तिषु च जैनविदुषो रामचन्द्रगुणचन्द्रयोर्दृष्टिर्भौतिकवादिनी। भरतो हि रसो तदास्वादे च भेदं करोति। रसः सुखदुःखात्मकभावाश्रितः कलात्मकस्थितिः सौन्दर्यसृष्टिर्वास्ति, तदास्वादश्च हर्षादि समन्वितः कश्चिद्वत्प्रीतिकरोऽनुभवः। उभयोरपि स्थितिर्भौतिकीति स्पष्टम्। रसोऽपि नूनमिन्द्रियगम्यस्तदास्वादोऽपि। भट्ठलोल्लटश्च रसं भावानुभूतेरभिन्नः मन्यते, काव्यास्वादञ्च चमत्काररूपम्। तन्मते रसभोक्तारो मूलनायकादयो भवन्ति। सहृदयस्तु तत्तादृश्यादिबलान्नटे तदारोपं कुर्वश्चमत्कारमनुभवति। अत्र रसत्वरूपमं स्पष्टतया भौतिकम्, परं नाट्यकौशलादिवशात् सहृदयानुभूतश्चमत्कारः किंस्वरूप इति दुर्वचम्। सोऽपि सन्दर्भेण भौतिक एवं प्रतिभाति, उपयुक्तप्रमाणाभावे तु तथा निर्णीतिः कदाचिदसमीचीना स्यात्। जैनाचार्ययोर्मतं सर्वथा निर्भ्रान्तम्। तदनुसारेण रसः सुखदुःखात्मकोऽनुभवः। श्रोतो प्रेक्षको वा तमेव स्वदते। यद्यप्यस्मिन्नास्वादे काव्यकौशलनाट्यकौशलजन्यश्चमत्कारोऽपि मिश्रितो भवति। अतस्तदनुसारेण काव्यानुभूतिर्नियमेनैन्द्रियानुभूतिरेव, सा च न सर्वदानन्दमयी।

आत्मवादः पुनः सुनिश्चितः आनन्दवादः। स एव भारतीयकाव्यशास्त्रप्रतिनिधिः। एतन्मतानुसारेण रसः काव्यानन्दः, नैन्द्रियानन्दो विषयानन्दो वा, स आत्मानन्देऽतिसन्निहितः, यद्यपि स्वयमसौ शुद्धात्मानन्दोऽपि न भवति। काव्यानन्दे रत्यादिभावभूमिकास्तित्वम्, ततो नायं सर्वथा विषयानन्दासंस्पृष्टः। भावाश्चेमे विशुद्धाः साधारणीकृता इति रागद्वेषविनिर्मुक्ताः। अतः काव्यानन्दे भौतिकांशो न्यूनश्चिन्मयांश्चाधिकः। चिन्मयांशप्राधान्याच्च स आत्मानन्दं सन्निधत्ते, रत्यादिभूमिकावशात्तु सोऽस्थायी सोपाधिकश्च न स्थायी निरुपाधिर्वा भवितुमर्हति। इत्थं काव्यानन्दस्थितिमध्यवर्तिनी। स विषयानन्दाच्छुद्धतरश्चिन्मयतरश्च, आत्मानन्दतुलनायां तु स्थूलोऽस्थायी च। वस्तुतो भारतीयेष्वानन्दवादिदर्शनेषु प्रत्येकमानन्दे आत्मास्वादरूपता प्रतिष्ठिता। विषयानन्देऽपि आनन्दतत्वमात्मास्वादस्यैव वाचकम्। काव्यानन्देऽपि आनन्दपदार्थो विशुद्धभावभूमिकायामात्मभोग एवेति स्पष्टम्। अतः काव्यानन्दोऽयमात्मानन्दान्न प्रकृत्या, अपि तु गुणेन भिन्नो विलक्षणश्चेति नासौ विषयानन्दो नाप्यात्मानन्दो विशुद्ध इत्याशयः।

पाश्चात्येषु काव्यास्वादस्वरूपेतिहासोऽतिरोचकः। प्लेटोर्बुद्धिमात्मानञ्चैकं तत्वं मन्यमानो द्विविधानुभूतिसत्तामंगीकरोति–आध्यात्मिकी बौद्धिकी वानुभूतिः, इन्द्रियगम्यानुभूतिश्चेति तत्र तेन काव्यानुभूतिः सौन्दर्यानुभूतेः (आत्मानुभूतित्वेन तन्मतायाः) पृथगैन्द्रियानुभूतिरिति मन्यते, अयञ्च मिथ्याभूतो निम्नकोटिकः कश्चिदस्वस्थ आनन्द इति च। सोक्रेतसः(सुकरातः) कथयति यदेतासु काश्चिदवत्कलाप्रक्रिया ईदृश्यो भवन्ति या आत्मनः परमकल्याणं विदधते। अन्याश्च

कल्याणमवज्ञाय केवलं सुखस्य तत्सिद्धेश्चोपायानेवावदधते। एता न पश्यन्ति यत्कतरः आनन्दः सन्नस्ति कतरश्चासन्निति।सोक्रेतसः पृच्छति—किमस्यास्त्रासदाया एवकमात्रं प्रयोजनं लक्ष्यं वा प्रेक्षकजनसुखप्रदानमेव, उत तद्विरोधकरणमपि। इयं पात्राणां मधुराणि दुरितान्यनुक्त्वा शब्दैर्गीतिश्च यथेच्छं प्रियाप्रियाणि सत्यान्याख्याति। युष्मन्मते वा किंस्वभावा।कलिक्लेसः प्रतिवक्ति:—सोक्रेतस, नात्र कश्चन सन्देहः सम्भवति, यदियं त्रासदा सामाजिकसुखपरितोषोन्मुखी भवति।

सोक्रेतसः पुनः पृच्छति—कलिक्लेस, किमिदं तादृशमेव वस्तु नास्ति, यदस्माभिरधुनैव चाटुक्रिया (मिथ्यापरितोष) इति नाम्नाऽभिहितम्।

अरस्तूरपि काव्यानन्दमाध्यात्मिकममत्वा लौकिकमेव मन्यते। परं प्लेटोवत् तमसन्तमस्वस्थञ्चोक्त्वा न गर्हयति। तन्मते काव्यानन्दो नाध्यात्मिकानन्दः, नापि प्रत्यक्ष ऐन्द्रियानन्दः, न चापि बौद्धिकानन्दः। स प्राकृतजीवनान्तर्गत एव प्रत्यभिज्ञानानन्दः। परं न प्रत्यक्षप्रत्यभिज्ञानसय अपि तु कल्पनात्मकः प्रत्यभिज्ञानस्यैवायमानन्दप्रत्यक्षैन्द्रियमानसिकानन्दात् सूक्ष्मतरः। अष्टादशशताब्दीभवेनांगलसमालोचकेनैडिसनेनायमेव कल्पनानन्द इत्युक्तः। कल्पनाया इमं गौणमानन्द स सर्वत्रैव तस्या मानसक्रियाया परिणामं मन्यते, या मूलवस्तूत्पन्नविचाराणां (मानसबिम्बानाम्) तत्तद्वास्तुमूर्तीनाम्, चित्राणां संगीतानां वाभिव्यञ्जनया समुत्पन्नैर्विचारैः (मानसबिम्बैः) सह तुलनां करोति। इदमुद्धरणं नूनमरस्तूतिव्याख्यानम्। एडिसनोऽत्र अरस्तूकृतामनिश्चितविवेचनां पारिभाषिक्यां शब्दावल्यां बद्धवानिति।प्लेटोऽरस्त्वोः परं ज्ञाताज्ञातया प्लेटोप्रेरणयायूरोपदेशे क्रमाद् आध्यात्मिकसौन्दर्य परिकल्पना व्यकसत्। क्रोचे स्वकीये एस्थेटिकनाम्नि प्रसिद्धग्रन्थे रहस्यवादिसौन्दर्यदर्शनमिति नाम्नेदमाम्नातवान्। अस्य स्पष्टप्रतिपादनं सर्वतः प्रथमं यूनानी—रोमी विद्वान् प्लेटिनसः कृतवान्। अत एव प्लटोनिर्णयोऽयं भ्रान्तिपूर्णो यत्कला प्रकृतिमनुकरोति, प्रकृतिश्च स्वयं ज्ञानस्यानुकृतिरिति। अनुकृतेरनुकृतित्वाच्च कला मिथ्याभूता, अस्पृहणीया चास्ति। यतः कलाया उद्गमोऽपि तदेव ज्ञानं यत्सवयं प्रकृतेः। इदं रहस्यवादिवाध्यात्मिकं वा सौन्दर्यदर्शनमन्धकारयुगे धर्मरागेण रञ्जितं, कलादर्शनस्य च धर्मध्यनेन सह घनिष्ठसम्बन्धः स्थापितोऽभूत्। कतिपयशताब्धनन्तरं यूरोपे शर्मण्याध्यात्मवादोद्भवविकासयोर्जातयोः सतोः सौन्दर्यस्य कलायाश्चापि अध्यात्मपरका गहना च व्याख्या प्रास्ताव्यत्। कांटशिल हीगेलादिभिरस्य सिद्धान्तस्य विकासे भूयः प्रयतितम्, पूर्णवोयुक्तम्। एषां दार्शनिकानां सूक्ष्मसैद्धान्तिकभेदानां विवेचनमत्र नाभीष्टम्, नाऽपि संगतम्। सामान्येनैषां समेषां मतमभूद् यत्कलायाः (सौन्दर्यस्य वा) सर्जनमाध्यात्मिकी क्रियास्ति 'इत्थं सौन्दर्यमात्मनो मूर्तया इन्द्रियगम्याया वाभिव्यक्तेरेव नामेति। एतेन रूपेण परिभाषितस्य सौन्दर्यस्य चर्वणापि स्वभावादाध्यात्मिक्येव स्यात्।

अतएवैतद्वर्गीयाणां विचारकाणां मतेन काव्यास्वाद आध्यात्मिक्यनुभूतिः प्रतिष्ठितः, यस्तावदेकतो योगक्षेमभावनानिर्मुक्तः, अपरतश्च बौद्धिकधारणावञ्चितः।

कालान्तरेऽस्यात्मवादिनः सौन्दर्यदर्शनस्य विरोधोऽभूत्। मार्क्सफ्रायडयोश्च युगान्तकारिणां सिद्धान्तानां प्रकाशे सौन्दर्यस्य तदनुभूतेश्चातिप्रबलैः शब्दैर्भौतिकवादिभ्यो व्याख्या अक्रियन्त। मार्क्सवादानुसारेण कलानुभूतिरार्थिकहितानुशिष्टा भौतिक्यनुभूतिरस्ति, फ्रायडमतेन तु कामप्रेरित ऐन्द्रिय आस्वादः। विंश्यां शताब्यामप्यनेके काव्यसिद्धान्ता आविरभवन्, यैः काव्यानुभूतिस्वरूपस्य बौद्धिकनैतिकमनोवैज्ञानिकानि व्याख्यानानि प्रास्तूयन्त। परं तानि प्रायः सर्वाण्यप्युपर्युक्तधारणानां रूपान्तराणि सन्ति। आम्, क्रोचेकल्पितः सहजानुभूतिसिद्धान्तः काञ्चिन्नूनततामानयत्। तन्मतेनात्मनो द्वे क्रिये स्तः–विचारात्मिका, व्यवहारात्मिका चेति। तत्र विचारात्मिकायाः क्रियाया ज्ञानस्य वा द्वैरूप्यम्–ज्ञानं स्वयं प्रकाश्यं प्रमेयं वा भवति, कल्पनाप्राप्तं ज्ञानम्, प्रमाप्राप्तं च। व्यष्टिज्ञानम्, समष्टिज्ञानञ्च। विशिष्टवस्तुज्ञानम्, तन्मिथः सम्बन्धज्ञानञ्च। वस्तुतो ज्ञानं बिम्बं वोत्पादयति धारणां वेति।कलायाः किल ज्ञानस्य प्रथमभेदेन स्वयंप्रकाश्यज्ञानेन सह सम्बन्धः। इदमेव सहजानुभूतिरित्यपि व्यपदिश्यते, कला सहजानुभूतिरेव। इत्थं क्रोचेमतेनापि कला काचिदाध्यात्मिकी क्रिया याऽऽत्मनो विचारात्मिकायाः प्रवृत्तेर्ज्ञानस्यैव वांगम्, कलायाः सहजानुभूतेर्वाऽऽस्वादः कलाकारस्य कृते आनन्दमयो भवति। मूर्तरूपधारितवत्यां च तस्यां स्वभावतस्तन्मूर्तरूपास्वादः सामाजिकस्य कृते आनन्दमयो भवति। अतोऽत्र कलायाः काव्यस्य वाऽऽस्वादं मूलत आध्यात्मिकं मत्वापि रागपेक्षया कल्पनाश्रितं मन्यते, क्रोचेपरिकल्पना चेयं वस्तुतोऽध्यात्मवादिना दार्शनिकानामरस्तूसम्बन्धिनीनां च धारणानां समन्वितं रूपम्।एतेन विवेचनेन काव्यानन्दस्य रसास्वादनसमुद्भूतानन्दस्य च स्वरूपे निम्नांकिताः सिद्धान्ता उपलभ्यन्ते–काव्यानन्दः प्रत्यक्षैन्द्रियमानसिकानन्दः। प्राचीनेषु प्लेटोर्नवीनेषु मार्क्सफ्रायडौ प्रातिस्विकशैल्यां मतमिदं प्रत्यपीपदन्।'काव्यानन्द आत्मिकानन्दस्यैवैकं रूपम्' इति संस्कृतसाहित्यप्रतिनिधीनाम् अभिनवजगन्नथादीनाम् आचार्याणां पाश्चात्यानाञ्चाध्यात्मवादिनां विचारकाणामदमेव मतम्।'काव्यानन्दः कल्पनानन्दः, इत्यरस्तूप्रेरितेनैडिसनेनाष्टादश्यां शताब्यामिदं मतं वर्तितम्। विंश्यां शताब्यां क्रोचेरिदमेव मतं दार्शनिकेन रूपेण प्रस्तूय काव्यानन्दं सहजानुभूत्यानन्दममन्यत।काव्यानन्दः सकललौकिकानुभवभिन्नः कश्चिद्विलक्षण आनन्दः सर्वथा निरपेक्ष इतीदं मतं यद्यप्यतिप्राचीनम्। परमेकोनविंश्या अन्ते बिंश्याश्च शताब्या उपक्रमेब्रेडलेव्लाइवबैलादिभिः कलावादिभिरिदं व्यवस्थिततया प्रतिष्ठापितम्। यद्यप्ययमपि सिद्धान्तोऽशतो रहस्यवादिप्रकृतिरागरञ्जितः, रिचर्डसेन चास्मिन् कांटहीगेलादीनाम् अप्रत्यक्षः प्रभावो दर्शितः तथापि विलक्षणानुभूतिरिति, आध्यात्मिकानुभूतिरिति च द्वयोरप्येकत्वाभिमानो नोचितः स्यात् विलक्षणानुभूतिर्हि न

केवलाया लौकिक्या अपि त्वाध्यात्मिक्या अपि विलक्षणैवास्ति।काव्यानन्दस्य रसस्य वा स्वरूपं निर्णेतुमिमे चत्वारः सिद्धान्ताः परीक्षणीयाः। तत्र चान्तिमादेव सिद्धान्तात्परीक्षोपक्रम उपयुज्येत। विलक्षणत्वपक्षे यावन्तस्तर्का दीयन्ते, ते तावदिदं तु साधयन्ति यदयं काव्यास्वादो भावास्वादात्–प्रत्यक्षाप्रत्यक्षैन्द्रियरागात्मकानुभूतिभ्यो भिन्नः, शुद्धबौद्धिकानुभवात्-समस्यासमाधानानुमानप्रमाणाद्यनुभवादपि भिन्नः, ततः शुद्धात्मानन्दात्- योगादिसम्बद्धानन्दादपि भिन्नः, परमेतेनैतन्न सिद्ध्यति यदयं सामान्यजीवनगतोऽनुभवो नास्तीति, ऐहलौकिकानुभवो नास्तीति वा। अस्ति हि तत्रैन्द्रियतत्वम्, बौद्धिकतत्वस्यापि न तत्रात्यन्ताभावः, आत्मास्तित्वे विश्वस्तानाञ्च मतेनात्मानुभूतेरपि तत्रास्पर्शो नास्ति। एतदनुभवस्वरूपसंघटनमनुभवान्तरभिन्नमेव, परमेतदाधारतत्वानि सर्वथा विलक्षणानि न सन्ति। तटस्थो व्यक्तिगतरागद्वेषविनिर्मुक्तः साधारणीकृतोऽप्यनुभवस्तावदैन्द्रियरागात्मकानुभवस्यैव परिष्कृतं रूपम्। यथा च रिचर्ड्सेनोल्लिखितम्-काव्यानुभूतेः सम्पूर्णप्रक्रियायामस्माकमिन्द्रियाणि, मनोबुद्धिश्चेत्यादयो माध्यमा भवन्ति।अतो यावद्वयं सौन्दर्यास्वादार्थ कस्यचिदतिरिक्तस्वेन्द्रियस्य सिद्धिं न कुर्मस्तावत्सौन्दर्यचेतना विलक्षणो भावः विलक्षणावानुभूतिरिति मान्यताऽसंगता स्यात् एतेन च तर्केण सुतरामसिद्धतामेति विलक्षणतावादिनां मतम्।काव्यानन्दः कल्पनानन्दः–इदं मतमंशतो युक्तियुक्तम्। काव्यानन्दे ह्यपरिहार्या भावभूमिकापि। इदं महत्वपूर्णं तत्वमत्रोपेक्षितम्। काव्यस्याधारो हि मूलतोऽस्माकं रागात्मकं जीवनम्। कल्पना त्वस्यानिवार्य माध्यममात्रम् इत्यन्दिग्धम्।अतः केवलकल्पनास्वादो न भवति। काव्यक्षेत्राद्बहिरपि ज्ञानस्य भूयःसु क्षेत्रेषु कल्पना प्रचुरतयोपयुज्यते। वैज्ञानिकेष्वाविष्कारेषु कल्पनया यावान्प्रयोगः, तावान् कुतोऽन्यत्र। परमेवंविधानामनुभूतीनां काव्यास्वादेन तु न कोऽपि सम्बन्धः। इतः परं कल्पनापि मानसिकी बौद्धिक्येव वा क्रिया। अतः कल्पनानन्दोऽपि मानसिकस्य बौद्धिकस्य वानन्दस्य परिधावेव विशति, न खल्वयमानन्दस्य कश्चिन्नूतनो भेदः प्रकारो वा।

काव्यानन्दः किलात्मानन्दस्यैवैकं रूपम्। वस्तुतो मन्तव्यमिदं दुस्तर्क्यम्। यतो ह्यात्मनोऽस्तित्वं स्वरूपञ्च विवादास्पदम्, भारतीयस्य रससिद्धान्तस्य मूलस्रोतः शैवदर्शनम् अनुसरतामानन्दः आत्मन एव स्वरूपम्। अतः प्रतिस्थिति आनन्द आत्मपरामर्शरूपः, आत्मास्वादरूप एव च। विषयानन्देऽप्यानन्दतत्वमास्वादस्यैव पर्यायः, इत्थं यथान्यत्र दर्शितम्, ऐन्द्रियस्यात्मिकस्य वानन्दस्य प्रकृत्या भेदो न गुणेन। विषयानन्दे, काव्यानन्दे, आत्मानन्दे च शुद्धत्वमात्रयेवान्तरम्। वेदान्तमतः किञ्चिद्भिन्नम्। तदनुसारेण ह्यैन्द्रियानन्दो मिथ्या, मायाजन्यभ्रान्तिमात्रम्। आत्मज्ञानमिति खल्वात्मनः शुद्धा निरुपाधिस्थितिरिति निर्वितर्कज्ञानस्यैव नामान्तरम्। पाश्चात्या अध्यात्मवादिनो दार्शनिकाः प्रायेणात्मानुभूतिमतीन्द्रियमनुभवं मन्यन्ते, परं

तेऽपीन्द्रियसंसर्गमत्र न निषेधन्ति। तेषामिदमेव मतम्, यदात्मानुभवेऽन्तत ऐन्द्रियसंसर्गो विच्छिद्यते, शुद्धनिर्विकारस्थाय्यानन्दस्थितिश्चावशिष्यते।

आसां व्याख्यानां प्रकाशे तावदिदं सर्वथा स्फुटतां गतम्, यत्काव्यानन्दो न शुद्धात्मानन्द इति, वस्तुतश्चैतत्कस्यचनापि नाभिमतम्। उभयोः प्रकृत्या भेदमभन्वानयोरपि गुणेन भेदोऽवश्यम्मतः। आत्मानन्दो यत्र शुद्धात्मतत्वभोगः, काव्यानन्दे तत्र भौतिकजीवनभूमिकाऽवश्यं भवति। साधारणीकृता भावभूमिकापि नाभौतिकी। तस्यां व्यक्तिगतरागद्वेषमुक्तिफलत्वेन भावः परिष्क्रियते, उन्नीयते, परमियं स्थितिरप्यभौतिकी वातीन्द्रिया कथं स्यात्? अस्या अप्यनुभवो मनसा क्रियते। काव्यानन्दः प्रत्यक्षस्थायिभावास्वादो नास्ति-काव्यनिबन्धनपरिशुद्धस्थायिभावास्वादः खल्वयम्। अत्र पृच्छ्यते–किमयं स्थायिभावः काव्यनिबद्धः सन् प्रमातृचेतनायां काव्यप्रभावेण व्यक्तिसंसर्गमुक्तश्च सन् आध्यात्मिक्याम् अनुभूतौ परिणमति? मन्मतेऽस्योत्तरं नकारात्मकमेव स्यात्। काव्यरचनाऽनुभूतिक्रिया नास्तीति। तस्मिन्नर्थे तु नूनमियं नास्त्येव, यस्मिन्नर्थे योगसाधनं ब्रह्मचिन्तनादिकं वा भवति। एवंस्थिते काव्यनिबद्धस्य काव्यप्रेरितस्य वा स्थायिभावस्यास्वादोऽपि आध्यात्मिकास्वादपदेन व्यपदेश्यो न भवति। काव्यानन्दशब्दः प्रचलितेऽर्थे न खल्वात्मानन्दशब्दस्य पर्यायो नापि रूपविशेषः। वस्तुतोऽस्यां स्थापनायां सामान्यदनुभवात्परं किं प्रमाणं स्यात्। यदीदमेव मत्वा प्रवर्तामहे यत्प्रत्यनुभूति आत्मानुभूतिरेवेति, प्रत्यानन्दञ्चात्मानन्दस्वरूपमेवेति, तदा तु सर्वेऽपि भेदा अपमृज्यन्ते। परन्तु वयमानन्दस्य विभिन्नेषु रूपेषु स्तरेषु च भेदं विदध्मश्चेतदा काव्यानन्दस्यात्यन्तोदात्तैकान्तावदातानुभवतां मन्यमानैरप्यात्मानन्दता न शक्यतेऽवधारयितुम्।काव्यानन्दः ऐन्द्रियानन्दः इति प्लेटोस्तं प्रत्यक्षमैन्द्रियानन्दमाह–परं तस्येदं मतं काव्यसत्यवस्तुसत्योर्भ्रान्तिमाश्रितम्, तच्चास्माभिः सतर्कमपास्तम्। तथापि प्रत्यक्ष ऐन्द्रियो लौकिको वानुभवोऽसन्नपि काव्यानन्दो लौकिकजीवनस्यैवानुभूतिरस्ति-इत्यस्य स्वतः स्पष्टस्य तथ्यस्य निषेधः कथमिव शक्यते कर्तुम्। भवक्तिरहस्यवादाभ्यामितरे सर्वेऽपि काव्यविषया लौकिका एव भवन्ति। तदुपकरणानि-भावकल्पनाबुद्ध्यादीनि तत्वान्यपि लौकिकान्येव। तत्र च तदास्वादमाध्यमाश्चक्षुःश्रोत्रमनोबुद्धयोऽपि लौकिका एव। आस्वादयितापि सवासनः सामाजिक एव, न भक्तो नापि योगी। एवंस्थिते काव्यानन्दो न लोकबाह्यः, नातीन्द्रियानुभूतिरिति निर्विवादम्। स खलु लौकिकी-ऐन्द्रियमानसिकी अनुभूतिरेवेत्यर्थः। यथा प्रतिपादितञ्च तदाधारो भाव इति। अतो मनोविज्ञानपरिधेरन्तरेवास्य स्वरूपं निर्णेतव्यम्। एतेनोदाहरणेनास्य विवेचनमत्युपयुक्तं स्यात्– इदं ध्यायतो मे मनो नूनमानन्दमनुभवति। श्रृंगारप्रसंगोऽयम्। ममास्य चानन्दस्य प्रेमभावेन रतिभावेन वा निश्चितः सम्बन्धः। मम मनो रतिभावानुभवाध्वनाऽऽनन्दमास्वादयति। तथाप्यस्मिन्नानन्दे

प्रत्यक्षप्रियमिलनात्मकरतिभावानन्दे च स्पष्टो भेद इत्यसन्दिग्धम्। अहमप्यनुभवामीमं भेदम्। प्रत्येकं सहृदयोऽपि तमनुभवति। कीदृशोऽयं भेदः। जीवनगताया रतेरनुभवः प्रत्यक्षविषयः व्यक्तिगतरागद्वेषाविष्टश्च, तत एव च तीव्रतरः। काव्यनिबद्धरतिभावस्य श्रृंगाररसस्य चानुभवः प्रत्यक्ष ऐन्द्रियमानसिकानुभवो नास्ति। नास्ति च व्यक्तिगतरागद्वेषाविष्टोऽपि। अतएव च न तीव्रतरः। अस्यानुभवस्य स्वरूपं प्रदर्शयितुं काव्यास्वादनप्रक्रियाऽवश्यं विश्लेषणीया। यदेमः षट्पङ्क्तीः पठामि तदा प्रथमं शब्दलययोः गीतं मच्चित्तमनुरञ्जयति, ततः प्रायोऽसंलक्ष्यक्रमव्यंग्यरीत्यार्थोऽवबुध्यते। तदन्तरं काव्यभाषायाः कल्पनात्मकानां लक्षणाव्यञ्जनागम्यानां तत्वानां प्रभावेण ममकल्पना सक्रिया भवति। सीमितार्थबोधबन्धनभंगेनानेकप्रकारकाणि संस्कारत्राणि मम मनस्युल्लसन्ति। विविधसञ्चारिभावपरिवृत्तो ममात्मीयो रतिभावबुध्यते, कश्चिद् वास्तविकं व्यक्तिविशेषं प्रत्युन्मुखीभावाभावाद्यो वैयक्तिकरागद्वेषमुक्तोऽस्ति, अन्ततश्चास्याः समग्राया अप्यनुभूवप्रक्रियायाः परिणतिः कस्याञ्चिदानुभूतौ भवति। इयं सुखदानुभूतिर्न प्रत्यक्षरतिभावानन्द इति स्फुटम्। परोक्षरतिभावस्य रतिभावस्मृतेर्वापि नायमानन्दः। कल्पनागतायामप्यनुभूतौ हि स्मृति र्व्यक्तिगतराद्वेषाभ्यां नूनमालिप्ता भवति। अतश्च सा सुखदुःखात्मिका, न चायं रतिभावस्य सफलविवेचनस्याप्यानन्दः, नेयं हि मूलतो बुद्धिक्रिया। अयं वस्तुतः कश्चित्समञ्जित आस्वादः। यत्रैन्द्रियरागात्मकबौद्धिकतत्वानां लवणसलिलसंयोगो जागर्ति। 'अथैक एव शब्दोऽवशिष्यतेऽनुभूतिरिति। यो व्याख्यामपेक्षते, कृतेऽनुभूतिविश्लेषणे संवेदनशब्द एवावशिष्यते। यदस्माकं मनोजगतोऽणुपरमाणुः कथ्यते। शारीरिकरूपेणैते प्रत्यक्षाः स्थूलाश्च भवन्ति, मानसिकरूपे तु सूक्ष्माः प्रतिविम्बरूपाश्च सम्पद्यन्ते। बौद्धिकरूपं यावद्गच्छन्तोऽमी त्वतिसूक्ष्मीभवन्ति, एषां प्रतिबिम्बा अपि तथा सूक्ष्मीभवन्ति यथ प्रायेणारूपा इव प्रतीयन्ते। तेषां केवलमन्वितिसूत्रमेवावशिष्यते न तु रूपम्। यथातिसूक्ष्मायाः श्रृंखलाया वलया न दृश्यन्ते, सूत्रमात्रं तु दृश्यते। एवमनुभूतिः स्वकीयेषु सर्वेषु मूलतः संवेदनरूपैव विद्यते। तस्यां शारीरिकमानसिकबौद्धिकेषु रूपेषु केवलं प्रत्यक्षत्वमात्रयैवान्तरं भवति, न मूलगतप्रकारस्य। अतः काव्यस्यानुभूतिरानन्दो वा संवेदनात्मक एव। संवेदनानि चैतानि न स्थूलानि नापिप्रत्यक्षाणि, अपितु सूक्ष्माणि प्रतिबिम्बरूपाणि च भवन्ति। साधारण्येन प्रत्यक्षत्वतीव्रत्वयोर्मात्राया विचारेण वयं क्रमात्त्रिविधानि संवेदनानि कल्पयितुं शक्नुमः। प्रथमानि तु शुद्धानि प्राकृतिकानि संवेदनानि (एतान्येकान्तप्रत्यक्षाणि स्थूलानि च) भवन्ति। यथा-वयं स्वप्रियजनप्रत्यक्षस्पर्शादिना प्राप्नुमः। द्वितीयानि तत्स्पर्शस्मरणजनितानि, प्रथमसंवेदनप्रतिविम्बरूपाणीमानि भवन्ति, स्वभावादेवैतानि न्यूनप्रत्यक्षत्वस्थौल्यानि, अधिकान्तरिकत्वसौक्ष्म्याणि च। तृतीयानि पुरातत्तत्स्मरणविश्लेषणबौद्धिकाध्ययनादिप्राप्तानि। प्रतिविम्बानामपि प्रतिविम्बकल्पानि। स्वभावादेव चात्यन्तान्तरिकसौक्ष्म्याणि भवन्ति। वस्तुतोऽमीषां स्थूलः शारीरिकश्चांशः

प्रायो नश्यत्येव। एतानि बौद्धिकसंवेदननाम्नोच्यन्तेऽस्माभिः। सर्वविधबौद्धिकक्रियासु वयमेवंविधानि संवेदनानि प्राप्नुमः। प्रत्यक्षजीवने प्रायेणैतान्येव त्रिविधानि संवेदनान्यस्माभिरनुभूयन्ते, द्वितीयतृतीयप्रकारयोस्तु संवेदनयोर्मध्ये चतुर्थप्रकारकाण्यपि संवेदनानि भवन्ति, यानि स्मृतभावनेन (कोचेवचनेषु तस्य सहजानुभूत्या, साधारणव्यावहारिकशब्दावल्याञ्च तस्य काव्यरूपोपस्थापनग्रहणाभ्याम्) प्राप्तानि भवन्ति। अयं भावनानुभवो न स्मृतेः प्रत्यक्षानुभवः, नापि तद्विश्लेषणादेर्बौद्धिकानुभवः। स्मृतेरनुभवादयं सूक्ष्मतरः बौद्धिकानुभवाच्चायं स्थूलतरो भवति। तेनैवानुपातेनास्य संवेदनान्यपि यथाक्रमं सूक्ष्मतराणि स्थूलतराणि च भवन्ति, एवं काव्यप्राप्तसंवेदनस्थितिः प्रत्यक्षमानसिकसंवेदनात्सूक्ष्मतरा बौद्धिकसंवेदनाच्चाधिकप्रत्यक्षा स्थूलतरा चाध्यवसीयते। अत एव काव्यानुभूतावेकतस्तस्या ऐन्द्रियानुभूतेः स्थूलत्वं तीव्रत्वञ्च न भवति, अपरतश्च बौद्धिकानुभूतेररूपत्वम्। तेन वैषां पूर्वस्याः शुद्धतरा, परिष्कृततरा च भवति, अपरस्याश्च सरसतरा।

काव्यानुभूतिः सिद्धेयं शुद्धा चापि परिष्कृता।

अथ रसास्वादस्यानिवार्यतयाऽऽनन्दमयत्वे सिद्धेकरुणादिरसास्वादः कथं प्रीतिकरो भवतीनि प्रश्नः स्वाभावादेवोदेति। अयञ्चापि प्रश्नः काव्यशास्त्रस्य मौलिको महत्वशाली च। यद्यपि भारतीयाचार्येषु प्रश्नोऽयं कदापि नातिविवादास्पदतां गतः। तथापीमं प्रति ते जागरूका आसन्। प्रत्यक्षतः परोक्षतो वा ते स्वशैल्यास्मिन् प्रश्ने विचारविमर्शमप्यकुर्वन्। तदीयतर्काणां सामग्र्येणाध्ययनेऽनेकानि गहनानि समाधानानि पुरस्तादुपतिष्ठन्ते।

काव्यनिर्मितिर्नियतिकृतनियमरहिता नानाचमत्कारमयी चास्ति। काव्यरसो लोकोत्तरः। तस्य कृते लौकिकानां कार्यकारणभावानां नानिवार्यत्वम्। दुःखाद्दुःखमुत्पद्यते इति लौकिको, नियमः। कवेस्त्वलौकिकप्रतिभास्पर्शेण काव्ये दुःखात्सुखोत्पत्तिः सहजा भवति। इदमेव नाम काव्यस्यालौकिकत्वम्। तथाहि–

'हेतुत्वं शोकहर्षादिगतिभ्यो लोकसंश्रयात्।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः।।
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः।।2इति।

'अयं हि लोकोत्तरस्य काव्यव्यापारकस्य महिमा, यत्प्रयोज्या अरमणीया अपि शोकादयः पदार्था आह्लादमलौकिकं जनयन्ति।' इति च।

अयं मूलतः स एव तर्कः, यः पाश्चात्यै, कावादिभिः ब्रेडलेब्लाइबवैलादिभिर्विंश्याः शताब्द्याः प्रारम्भे पुनः प्रास्तूयत—

'प्रथमन्त्वयमनुभवः स्वत एव स्वोद्देश्यम्, स्वार्थमेवेष स्पृहणीयः। अस्त्यस्य स्वस्यापि निजमूल्यम्। अपरञ्च काव्यदृष्ट्यास्येदं निजमूल्यमेव महत्वशालि वरीवर्ति।

सामान्यतो हि वस्तुजगतोऽंगत्वम्, तदनुकृतित्वम् वा नास्य प्रकृतिः, इदं तु स्वयमेव स्वस्मिन्नेवैकं जगदस्ति—स्वतन्त्रम्, स्वतः पूर्णम्, स्वायत्तञ्च।'इति।

अमीभिरालोचकैरानन्दशब्दमप्रयुञ्जानैः आस्वादशब्द एव प्रयुक्तः, परं यथान्यत्र स्पष्टीकृतम्, तथेमे कलावादिनः सौन्दर्यवादिनो वालोचका वस्तुतः सन्त्यानन्दवादिन एव।

इदं समाधानं रसस्यालौकिकत्वमाश्रितम्। तस्यैव सिद्ध्यसिद्ध्योश्चास्य मान्यत्वं निर्भरम्। पराकालादेव कवेर्व्यक्तित्वस्य, प्रतिभायाः, तज्जन्यकाव्यस्य, तदास्वादस्येति सर्वेषामपि कृते व्यवहारे अलौकिकमिति विशेषणं प्रयुज्यते। प्राचीनकाले यूनानरोमादिदेशेष्वत्र भारते च शक्तिभिर्विभूषितो भवतीति मन्यतेस्म स्वयं प्लेटोऽपि दिव्यप्रेरणासिद्धान्तमक्लृपत्। परमद्य तदुक्तिं वयं लक्ष्यार्थतयैव ग्रहीतुं प्रभवामः, न वाच्यार्थतया। वस्तुतः कवेः साधारणमानवस्य च प्रतिभयोः काव्ये बौद्धिक कर्मणि, काव्यरसस्य जीवनरसस्य च रूपान्तरेषु विशेषान्मानसिक बौद्धिकः। रसे-गुणकृतमेवान्तर न प्रकृतिकृतम। अतः सर्वथा मान्यमिदं यत्काव्यगतस्य शोकस्थायिभावस्यानुभवो लौकिकशोकस्यानुभवाद्भिन्नः, किन्त्वसौ नालौकिकः। प्रत्यक्षशोकानुभवाभावेऽपि स लौकिकानुभवकोटिमेवाटीकते। नैवासौ हि कस्याश्चिद्वद लोकिकशक्तेश्चमत्कारः। यतः सामान्यशोकस्य काव्यगतशोकस्थायिभावतया परिणमयन्ती कविप्रतिभापि नास्ति काचिदपार्थिवी शक्तिः।

अपरं समाधानं सम्भीरतरम्। भट्टनायकेन स्वपूर्वाचार्याणां विशेषतो भट्टलोल्लटस्य सिद्धान्तं-प्रतीतिवादं-निराकर्तुं तर्कोऽयं दत्तः—

'स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्।'इति।

अस्यायमाशयो यत्करुणरसस्यास्वादो दुःखमयो न सम्भवति। अतः प्रतीतिसिद्धान्तो न सिद्ध्यति। 'रसः प्रतीयते' इति मन्यते चेत्करुणरसस्य सुखमयास्वादे प्रश्नः समाधातुं न शक्यते। इत्थं पूर्वपक्षं प्रस्तूय भट्टनायकः स्वमतेन तं समाधत्ते—

'तस्मात्काव्ये दोषाभावगुणालंकारमयत्वलक्षणेन नाट्ये चतुर्विधाभिनयरूपेण निबिडनिजमोहंकटतानिवारणकारिणा विभावादिसाधारणीकरणात्मनाभिधातो द्वितीयांशेन भावकत्वव्यापारेण भाव्यमानो रसो भोगेन पर भुज्यते।'इति।

काव्ये शब्दार्थयोर्दोषमुक्तत्व-गुणालंकारयुक्तत्व-सम्पादको व्यापारः काव्यकौशलम्, नाट्यं च चतुर्विधाभिनयसम्पादको व्यापारो नाट्यकौशलमिति भावकत्वपदार्थः। अयं च व्यापारोऽभिधया वाच्यार्थे बोधिते प्रवर्तते। अस्य द्वे कर्मणी भवतः-सामाजिक-चेतनाया निबिडनिजमोहसंकटतो मुक्तिः, व्यक्तिगतरागद्वेषप्रभावपरिहार इति यावत्, विभावाद्यसाधारणीकरणञ्चेति। अनेनैव भावकत्वव्यापारेण भाव्यमानस्य रसस्य सहृदयो भोगं-सुखदचर्वणं करोति।

अयमभिप्रायः काव्यास्वादसमये सहृदयो लोकवत् शोकादिस्थायिभावानां दुःखमयी प्रतीतिं न विन्दति अतः अतः करुणरसाद्यास्वादो दुःखमयो न भवति। काव्ये कविर्भावकत्वव्यापारेण शब्दार्थौ दोषमुक्तौ गुणालंकारयुक्तौ च सम्पादयन् बिम्बविधायिन्याः कल्पनायाश्चमत्कारेण-शोकादिस्थायिभावान् तदाश्रयैरालम्बनादिभिः सह साधारणीकृत्य प्रस्तौति। एतत्क्रियाद्वयपरिणामेन शोकादयः कटुभावा व्यक्तिगतरागद्वेषादिसंसर्गनिर्मुक्ता रसरूपतया भाव्यन्ते, सुखदचर्वणयोग्याः क्रियन्ते। अतः कविर्दुःखं सुखीकर्तुं साधनद्वयं बिभर्ति, यन्मिथोऽपि सम्बध्यते, काव्यकौशलं कल्पनाचमत्कारो वा-साधारणीकरणञ्चेति। यद्यपि ते साधने मिथो भिन्ने तथापि साधारणीकरणप्रक्रियाया अपि कल्पनासम्पन्नतया ते मिथः सम्बद्धे अपि भवतः। कल्पनाचमत्कारेण साधारणीकृतानां शोकादीनां वैशिष्ट्यं नश्यति, व्यक्तिसम्बन्धमुक्त्या च तेषां स्थूलालौकिकसम्बन्धा नश्यन्ति। तेषां स्वरूपं सामान्यजीवनगतानुभूतेरुदात्ततरमवदाततरञ्च जायते। भारतीयदर्शनशब्दैः 'व्यक्तिगताल्पचेतनायां सुखं नास्ति, व्यक्तिसीमनिर्मुक्तभूमन्श्चेतनायां तु परमसुखमुपलभ्यते। एतेनैव न्यायेन काव्ये शोकादयोऽप्रियभावा अपि साधारणीकृता व्यक्तिसम्बन्धजन्यदोषनिर्मुक्ता रसमयाः सम्पद्यन्ते। स्वर्गीयः पण्डितकेशवप्रसादमिश्रो योगप्रतिपादिताया मधुमत्या आधारेणेयं काव्यस्य रसवती भूमिकेत्युक्तवान्।

अस्यतर्कस्यसंकेतस्तावदरस्तूविवेचनेऽप्युलभ्यते, किन्त्वसावत्यन्ताविकसितावस्थः। प्राध्यापकबुचरो यया शब्दावल्या तमन्ववदत्, या यूरोपीयस्य विकासशीलस्यालोचनाशास्त्रस्य आधुनिकी शब्दावली वर्तते:—

'दुःखनिहितदंशस्य—अशान्तिवैक्लव्यात्मनः—जन्म स्वार्थभावनातो भवति-या वास्तविकजीवनेऽमीभिर्मनोवेगैः सह सम्बद्धा भवति। अहंभावे नष्टे दुःखमपि नश्यति, लेखकः वयमपीदं परिजानीते-यदि कश्चिद्विप्रतियत यन्मनोवेगानां साधारणीकरणात्मको विचारोऽयमाधुनिक इति, तदा वयं समादध्मः यदि नासीदयमरस्तूहृदयाशयः, तर्हि तत्सिद्धान्तसहजपरिणामस्तु नूनमस्त्येव।

आंग्लालोचकस्तावदेलरडाइसनिकलो दुःखास्वादस्यानेककारणेषु सार्वभौमभावनाप्रतिपादनं प्रायोऽननैवाशयेनाकरोत्—

'अस्य कारणमंशतः सा सार्वभौमभावनाऽप्यस्ति, या प्रतित्रासदं मूलभूतगुणतया स्वीक्रियते। अस्यार्थस्तावदसीमेन सह सम्पर्कः। यद्यास्तिकाः स्मस्तदा वक्ष्यामो यदयं दिव्यशक्तिभिः सह सम्पर्क इति। यदि च नास्तिकास्तदा विश्वस्य विराजाऽसीमया च सत्तया सम्पर्क इति। उत्तमायां त्रासदायां सर्वत्रैवैवंविधस्योदात्तीकरणस्य भावना भवति।

अनया दृशा भट्टनायकस्य महत्वमसन्दिग्धम्। स हि नितान्ताताकिंक्यां तात्विक्यां शब्दावल्यां साधारणीकरणसिद्धान्तेन करुणादिभोगं प्रत्यपीपदत्।

अभिव्यक्तिवादिनां तृतीयं समाधानम्—तन्मते रसो नोत्पद्यते, न प्रतीयते, न च भुज्यते। शब्दार्थादिमाध्यमेन विशुद्धभावभूमिकामात्मास्वादो हि रसपदार्थः आत्मास्वादश्चानन्दमयो भवति। तत्र कथं दुःखमाशंक्यते, केवलं तद्वैचित्र्याय रतिशोकादिसंस्काराः (स्थायिभावा) व्याप्रियन्ते।

'अस्मन्मते तु संवेदनमेवानन्दधनमास्वाद्यते। तत्र का दुःखाशंका, केवलं तस्यैव चित्रताकरणे रतिशोकादिवासनाव्यापार इति।

अतः करुणरसे व्यक्तिबद्धस्य शोकस्य प्रतीतिः प्रत्यक्षानुभवो वा न भवति। प्रत्युत साधारणीकृतस्य शोकस्य भूमिकायां तन्निमित्तेन वाऽऽनन्दधनात्मास्वादो भवति सहजानन्दरूपः। अनेन तर्केण वस्तुकलायोगात्मकं काव्यं रसं नोत्पादयति, असदेव ह्युत्पाद्यते। आत्मानन्दरूपो रसस्तु सन्नेव। काव्यं तत्र निमित्तमात्रम्, तद्धि वस्तुतत्वकलासौन्दर्याभ्यां व्यक्तिगतरागद्वेषजन्यविघ्नानपाकृत्य आत्मनः सहजरसमयं रूपमभिव्यनक्ति—आत्मास्वादप्रत्यूहानपोहति। श्रृंगारकाव्यस्यापीदमेव कर्तव्यं कर्म, करुणकाव्यस्यापि। इत्यादिमधुरभावानां वर्णनमपि यदि देशकालबन्धनिर्मुक्तं न जायते तदा तद्रसाभिव्यक्तये न प्रभवति। अपरत्र शोकादिकटुभावानां वर्णनं यदि कलादृष्ट्या सफलं स्यात्, व्यक्तिसम्बन्धमुक्तं सदुपेयात् तदा तदपि परमरसमयं सम्पद्यते। व्यक्तिसम्बन्धो रागद्वेषस्थितिर्वा रजस्तमः प्राधान्यस्थितिरस्ति नानाविघ्नमयी, ततो मुक्तिः किल रजस्तमः शमनं सत्वोद्रेकश्च, आत्मनः सहजानन्दरूपस्य परामर्श इत्यर्थः।

नानाभावसमृद्धं काव्यं मानवं रागद्वेषादिमुक्तं कृत्वाऽऽत्मसाक्षात्काराय-आनन्दधनरसानुभूतये-प्रवर्तयति। अते काव्ये भावस्य लौकिकस्वरूपम् न महीयते, अपितु भावस्य कलात्मिका सफलाभिव्यक्तरेव तत्र महत्वशालिनी भवति, या सहृदयं व्यक्तिगतरागद्वेषाभ्यां विचोच्यात्मानन्दरूपरसानुभूतौ प्रेरयति—इत्ययं सिद्धान्तोऽद्वैतं, विशेषतः शैवाद्वैतमाश्रितोऽरितः, यत्रात्मा परमरसरूपो मन्यते—'रसो वै स'इति श्रुतेः।

अमुमेव सिद्धान्तमाश्रितं शारदातनयस्यापि समाधानम्। तस्यायं तर्कः-यद्यपि संसारोऽयं दुःखमोहादिकलुषितः, तथापि जीवात्मा रागविद्याकलाख्यैः स्वकीयैस्त्रिभिस्तत्वैरिमं भुङ्क्ते। तत्र रागः सुखत्वाभिमानः, विद्या रागस्य तदनुपादानं येनाविद्याच्छन्नचैतन्यस्य ज्ञानमभिव्यज्यते, कला चात्माभिज्वलनहेतुः। एतेनैव न्यायेन प्रेक्षकोऽपि शोकभयग्लान्यादिनिष्पन्नानां करुणभयानकबीभत्सादिरसानामात्मस्थैस्त्रिभिस्तत्वै रागविद्याकलाख्यैश्चर्वणं कुरुते—
अस्य तर्कस्य तावदयमाधारो यदात्मा नित्यानन्दरूपः। तस्य आनन्दमयी प्रवृत्तिस्तथा प्रबला, यथा स संसारस्य दुःखमोहादिषु मायाजन्येषु कलुषेष्वनिवार्यतया विजयं प्राप्य तानि भोग्यानि निष्पादयति। करुणरसस्याऽऽस्वाद्यताया निदानमप्यात्मनः सेयमानन्दमयी प्रवृत्तिः। इदं समाधानं विशुद्धं भारतीयमानन्दवादमाधृतमस्ति।

करुणप्रधानं मसीहीदर्शनमाश्रिते परवर्तिनि पाश्चात्ये काव्यशास्त्रेऽस्य प्रतिध्वनिरपि प्रायो नावाप्यते। विंश्याः शताब्द्याः पूर्वार्धे ल्यूकस एव केवलं भौतिकस्तरे किञ्चित् किञ्चिदेवंविधं त्रासदानन्दस्य व्याख्यानमकरोत्–

'आनन्दस्यविशेषोपदानं त्रासदाकार्यम्, न किञ्चिदन्यत् अनुभवः, अधिकाधिकानुभवः इतीदमेवास्माकमीप्सितम्। अतो वयं त्रासदां प्रेक्षितुं गच्छामः। न तु वयमावेगेभ्यो मुक्तिमिच्छाम इति, प्रत्युत, वयं प्राचुर्येणावेगानामनुभवमिच्छाम इति हेतोः। अस्माकं लक्ष्यं भावानां भोग एव, न तु विरेचनम्।

नेदमवश्यवक्तव्यं यदुपर्युक्तमन्तव्याधारभूतं दर्शनं भिन्नमिति, तथापि समस्यासमाधानमुभयोरपि प्रायः समानम्। एकत्रात्मरसो निदानम्, अन्यत्र जीवनरसः।

शारदातनयस्त्वन्ततो भाववादिनां परिधाववर्तत, रुद्रभट्टस्तु ततोऽप्यधिकं च। नाट्यदर्पणलेखकौ रामचन्द्रगुणचन्द्रौ शास्त्रीयपरम्पराप्रतीपैरतिनिर्भीकैः शब्दैरिदं स्थापितवन्तौ–'सुखदुःखात्मको रस, इति रसानुभूतिर्न सर्वत्र सुखात्मिका, अपितु दुःखात्मिकापि सेति।3 तथाहि–

'तत्रेष्टविभावादिप्रथितस्वरूपसम्पत्तयः श्रृंगारहास्यवीराद्भुतशान्ताः पञ्चसुखात्मानोऽपरे पुनरनिष्टविभावाद्युपनीतात्मानः करुणरौद्रवीभत्सभयानकाश्चत्वारो दुःखात्मानः।' इति।

तत्र प्रश्नोऽयमुदेति यदित्थस्थिते सामाजिकः करुणादिप्रेक्षणश्रवणे कथं करोति। नाट्यदर्पणे प्रश्नोऽयं सविस्तरमुत्तरितः—

'यत्पुनरेभिरपि चमत्कारो दृश्यते स रसास्वादविरामे सति। यथावस्थितवस्तुप्रदर्शकेन कविनटशक्तिकौशलेन, विस्मयन्ते हि शिरश्छेदकारिणापि प्रहारकुशलेन वैरिणा शौण्डीरमानिनः। अनेनैव च सर्वांगाह्लादकेन कविनटशक्तिजन्मना चमत्कारेण विप्रलब्धाः परमानन्दरूपतां दुःखात्मकेष्वपिकरुणादिषु सुमेधसः प्रतिजानते एतदास्वादलौल्येन प्रेक्षका अप्येतेषु प्रवर्तन्ते। कवयस्तु सुखदुःखात्मकसंसारानुरूप्येण रामादिचरितं निबध्नन्तः सुखदुःखात्मकरसानुविद्धमेव ग्रथ्नन्ति। पानकमाधुर्यमिव च तीक्ष्णास्वादेन दुःखास्वादेन सुतरां सुखानि स्वदन्ते।

एतद्विवेचनाधारेण जैनाचार्याभ्यां प्रस्तुतं समाधानमिदमभिप्रायकम्–

करुणरसप्राप्तश्चमत्कार आनन्दो वा काव्यकौशलम्, काव्यनाट्योभ्यसमवेतकौशलं वाश्रितः। प्रेक्षकः श्रोता वा करुणरसे नानुभवत्यानन्दम्, प्रत्युत तद भिव्यञ्जककविनटकलानैपुण्येन स चमत्कृतो भवति। अनेन चमत्कारेणैव करुणरसे आनन्दस्य भ्रान्तिराभासो वोपजायते। कलासौन्दर्यं शोकोद्वेगमपि चमत्कारे परिणमयतीत्यर्थः। कलाया आधारभूतश्च सिद्धान्तोऽस्ति–सामञ्जस्यात्मकः–अनेकतायामेकतास्थापनम् अन्तर्वृत्तीनां समन्वयेनयं प्रक्रिया स्वतः सुखदा भवति। अयमेव कलासर्जनस्य सौन्दर्यं सृष्टिर्वाऽऽनन्द इत्युच्यते। कलासर्जनसमये कवेः कलानुभूतिसमये च सहृदयस्य चित्तमनया प्रक्रियया

समाहितं सद् उक्तमानन्दमनुभवति। अतोऽतिरिक्ता समृद्धाभिव्यञ्जना विशिष्टा पदरचना, संगीतगुणाः, नाटके नाट्यप्रसाधनादयः काव्यालंकाराश्चैतज्जन्य आह्लादोऽपि करुणस्य कटुताया अपनयने सहायकीभवति।

यूरोपीयालोचनाशास्त्रेऽपि कैश्चिदालोचकैरिदमेव मतं स्थापितं तत्रैतत्, काव्यरूपसिद्धान्त इति नाम्नाभिहितम्, एतेन सिद्धान्तेन काव्यरूपस्य सौन्दर्येण करुणरसस्य कटुतापनीयते, सहृदयश्च चमत्कारमनुभवति।

एतदतिरिक्तान्युत्तमत्रासदायामेतादृंशि तत्वान्तराण्यपि भवन्ति यान्यस्मत्समक्षं प्रस्तुतकथानिर्विडान्धकारविघटने सहायकीभवन्ति। यथा नाटककारस्य सर्जनात्मककलाप्रतिमा, छन्दोगतयः, विशेषाद् यूनानीयेषु एलिजावेथयुगीनेषु नाटकेषु, यानि कतिपयक्षणेभ्योऽस्मन्मनस्त्रासदाया अन्धकाराच्छन्नगम्भीरताभ्यो बलाद् दूरं नयन्ति। त्रासदायां छन्दसां प्रयोगमहत्वयोर्विस्तृतं विवेचनं पुरस्तात्करिष्यामः अत्र तावदिदं शक्यते वक्तुम्, यच्छन्दांसि बहुधास्मदिन्द्रियाणां कृते सम्मोहनौषधिकार्य निर्वर्तयन्ति। एस्किलसशेक्सपियरनाटकेषु भाषासौन्दर्येण दुःखदंशः किञ्चित्कुण्ठितो भवति। यद्यप्ययं रूपान्तरेण कदाचित्तीव्रतरोऽपि भवति तस्य स्थूलानि निष्कृष्टानि तत्वानि तु नश्यन्त्येव।करुणरसभोगविषये भारतीयकाव्यशास्त्रे प्रत्यक्षाप्रत्यक्षरूपतः प्रायोऽप्रत्यक्षरूपादेव उपर्युक्तानि समाधानानि समुपस्थापितानि। तत्र पाश्चात्यकाव्यशास्त्रे तूपक्रमादेवायमेको ज्वलन् प्रश्नोऽवर्तत, अरस्तूतत्पूर्वाचार्येभ्योऽद्यावति विस्तरेण बहुधा च त्रासदास्वादविषमसमस्या विवेचिताऽभवन्।सर्वतः प्रथममरस्तूकृतः प्रसिद्धो विरेचनसिद्धान्तः समागच्छतिः–

'त्रासदेति कस्यचिद्गम्भीरस्य स्वतः पूर्णस्य निश्चितायामयुक्तस्य कार्यस्यानुकृतेर्नाम यत्र करुणात्रासयोरुद्रेकेणैषां मनोविकाराणामुचितं विरेचनं विधीयते।

त्रासदायां शोकत्रासादिभावानामतिरञ्जितं रूपमनुभूतवतः प्रेक्षकस्य स्वकीयाः शोकत्रासादयो भावा उद्बुध्यन्ते, अभिव्यज्यन्ते च। बाह्योत्तेजनया तेषां स्ववासनात्मतया स्थिताः कटुका मनोविकाराः सहसोत्तेजिताः सन्तोऽभिव्यज्यन्ते, एवञ्च तद्दर्शननिवृत्तिस्तत्फलतया च प्रेक्षकमनोविशदीभावो जायते। वैद्यपुत्रस्यारस्तूमहाभागस्यैतत्समाधानं चिकित्साशास्त्रमाश्रितम्। यथ रेचकौषधिरशुद्धमस्वास्थ्यमरञ्च पदार्थं बहिष्कृत्य रुग्णस्य कायव्यवस्थां शुद्धां स्वस्थाञ्च सम्पादयति, तथा त्रासदा चित्ते वासनात्मतया स्थितान् मनोविकारानुद्बोध्याभिव्यज्य च प्रेक्षकस्य चेतनां विशदीकरोति। अस्मन्मनसि नानाविधा विकारा उद्भमन्ति यैश्चेतना प्रकृतिं नाप्यते, एभ्यश्च विकारेभ्यो मुक्तेरुपायद्वयम् शमनम् (प्लेटोनिर्दिष्टम्) अभिव्यक्तिश्च (अरस्तूनिर्दिष्टा)। त्रासदा द्वितीयमुपायमवलम्बते, यः प्रथमापेक्षया निसर्गादनुकूलतरः। इत्थं त्रासदाप्रसंगानां प्रेक्षणश्रवणमननैश्चित्तं निर्विकारं भवति। चित्तस्येयं निर्विकारा स्थितर्नूनं शान्तिमयी

सुखमयी च भवति। अयं सिद्धान्तोऽस्माभिः 'अरस्तू का काव्यशास्त्र' इति नाम्नि ग्रन्थे सविस्तरं विवेचितः। अस्यायं विशदतमो दोषो यदयं काव्यास्वादस्याभावात्मकं रूपं व्याख्याय विरमति। इत्थं च निष्पन्नोऽनुभवः शान्तिमयतयाऽन्ततः सुखमयस्तु भवत्येव, किन्तु आनन्दस्येदमभावात्मकं रूपमस्ति। अविश्वसनीयमिदं च भवति यत्प्रेक्षकः केवलं चित्तशान्तयो, अभावात्मकस्यास्यापलब्धये च-प्रेक्षागृहं काव्यं प्रति वाऽऽवर्जितो भवति। पाश्चात्यैरालोचकैरप्यस्यैतदाधारेणैव निरासः कृतः। ल्यूकसस्तु स्फुटमाह प्रेक्षको न भावानां विरेचनाय, अपितु भोगाय नाटकं काव्यं प्रति वा साग्रहं प्रवर्तते, प्रेक्षागृहं नूनं न चिकित्सालय इति। विरेचनसिद्धान्ततिरिक्तानि समाधानान्तराण्यपि बहूनि सन्ति। यानि पाश्चात्यैदर्शिनिकैः समालोचकैश्च समर्थपदावल्यां प्रस्तुतानि। रूसो मन्यते यत् प्रेक्षकेण पाठकेन च त्रासदायां कश्चिद् द्वेषजन्य आनन्दः प्राप्यते, यस्याधारः परपीडनस्वपीडनात्मिकायां सहजायां मानववृत्तौ निहितोऽस्ति। वयमन्यदुःखेन प्रच्छन्नं सुखं विन्दामः। मानवस्यायमादिमः पाशविकसंस्कारः, येन रंगमञ्चे नायिकानायकविपदं साक्षात्कृत्य सामाजिको भूयस्तादृशमेव किञ्चित्सुखं प्राप्नोति। यथा कस्यचिद् बालकस्य तितलिकामनोहरपक्षच्छेदने भवति। परपीडनस्यापरः प्रान्तः स्वपीडनमस्ति। आत्मपीडायामपि मानवः कञ्चिद्रसं लभते, दुःखमपि हि विलासभेदः। वस्तुतः प्रवृत्ती इमे असाधारणया अवसाधारणाया वा मनःस्थितेर्द्योतिके स्तः। सामान्यायां स्वस्थायां वा चित्तवृत्तौ परपीडनं स्वपीडनं वा न सम्भाव्यते। अतोऽनेके विचारका अनयोः स्थाने मानवसहानुभूतिं कल्पयन्ति। तन्मते कारुणिकदृश्येषु मानवसहानुभूतिसुखमवाप्यते। ते पदमात्रमग्रे प्रसृत्य पुनरिदं साधयन्ति यत् परसहानुभूतिर्वस्तुत आत्मसहानुभूतेरवैकं रूपान्तरम्। अनेनैवंविधेन चान्येन विचारभरेण सह आंगलकवेः शैलेयस्य फ्रांसीसीविचारकस्य च फोन्तनेलस्य नामनी सम्बद्धे स्तः। यौ विश्वसितः यदिह सुखदुःखयोः सोदर्यसम्बन्धः। प्रसिद्धेन शर्मण्यदार्शनिकेन शोपेनहोरेणामुमेव विचारं दार्शनिकशब्दावल्यामभिव्यञ्जयता व्यलेखि यत्त्रासदा जीवनस्य गम्भीरे दुःखमये च पक्षे महत्वमाधत्ते, जीवनवैयर्थ्यं जगत्प्रपञ्चसारत्वं चाभिव्यज्य चरमस्य सत्यस्योद्घाटनमेव तस्याः प्रयोजनम्। शर्मण्येनैव दार्शनिकान्तरेण श्लेगेलेनायं विचारो भंगयन्तरेण प्रस्तुतः। तन्मतेन त्रासदयाऽस्मन्मनसि तावदियं चेतनोदयतेयत्पार्थिवजीवनसंचालन कस्याश्चिवदृष्टशक्तेर्हस्ते आस्ते, यत्समक्षं मानववलवैभवं तुच्छायते। अयं विचारो यत्रैकत्राहंकारं शमयति, तत्रैवापरत्र दुःखेवापरत्र दुःखेऽस्माकं धैर्यमप्यनुबध्नाति। जीवनगतस्यास्यालौकिकविधानस्यानुभूतिर्नूनमुदात्तभावः कश्चिवदस्ति येन मानवः शान्तिमृच्छति इदमेव च 'त्रासदानन्द' रहस्याम्। एतानि समस्तानि समाधानानि दुःखवादमधिश्रितानि, विभिन्नाभिर्दृष्टिभिर्दुःखरसमेव त्रासदाया मूलास्वादं वदन्तीत्याशयः। यद्यपि सत्यस्य न्यूनाधिकोंऽशः प्रायः प्रतिविचारमातिष्ठति, एष्वपि

विचारेषु य स नून विद्यते किन्त्वेतेषु भूयांसोऽस्मज्जिज्ञासां परितोषयितुं न प्रभवन्ति। यथा परपीडनसुखं मानवस्य पाशविकसंस्कारान् द्योतयति, यदा वस्तुतः कलायाश्चरममुद्देश्यं चेतनापरिष्कार एव भवति। प्राचीनानां पाशविकविनोदोत्सवानां दृष्टान्तेन कलायास्तैः सहैकात्म्यस्थापनं नितरामसंगतम्। तथैव स्वपीडनप्रवृत्तिरपि सामान्यसहजां मनःस्थितिं न द्योतयति। मानवसहानुभूतितर्कः संगच्छते तदपेक्षया। परं प्रश्नोऽयमुदेति यद् वास्तविके जीवने करुणदृश्यसाक्षात्कारेणापि मानवकरुणा तत्सहानुभूतिर्वोद्रिच्यते, किन्तु तत्र तु नोद्भवति सुखम्। एवं विधेषु प्रसंगेष्वस्माकमुदात्तभावानां उल्लसति, कर्तव्यबुद्धिर्जागर्ति, व्यक्तिगतसंगीर्णतानिर्मुक्ताऽस्मचेतना सात्विकी भवति। तथापि नायमनुभवः सुखमयः, तस्या वृत्तेर्वयमात्मानं रक्षामं इत्यत्र प्रमाणम् सुखावृत्तिकामना तु सर्वथा स्वाभाविकी। एवंस्थिते मानवसहानुभूति-मानवकरुणाऽऽत्मकरुणादीनाम्आधारेण करुणरसास्वादसमस्या न समाधीयते। शोपेनहोरस्य दार्शनिकं समाधानं दुःखवादमाश्रितम्, भारतीयबौद्धदर्शनञ्चैतं सिद्धान्तं प्रेरयति, पोषयति च। बौद्धदर्शनानुसारेण दुःखं प्रथमार्यसत्यम् अस्य सम्यग्ज्ञानं जीवनस्य प्रथमा सिद्धिः, यत्र सिद्ध्यन्तराणि समाश्रितानि अतः करुणरसो जीवनस्याद्यो रसः। सत्योपलब्धौ निहित आनन्द एव जीवने करुणस्यांगित्वं प्रतिपादयतः काव्यादुपलभ्यते। भारते दुःखवादः प्राधान्येन बौद्धदर्शनं एव प्रतिपाद्यते। अतः करुणरसास्वादस्येदं दुःखवादि समाधानं केवलं तत्रैवोपलभ्यम्। भारतीयचिन्तकस्य कृते श्लेगेलधारणापि नाज्ञातचरा। साहित्येऽस्य नियतिवादस्य शताधिका मार्मिक्यो व्यञ्जना विराजन्ते। रामायणे, महाभारते, पुराणे, भक्तिकाव्ये, आधुनिकसाहित्ये चास्यानुरणनं पदे-पदे समासाद्यते। न जाने कदाप्रभृति भारतीयं मानसमिदं गायं गायं स्वस्य धैर्य वितन्वदस्ति। परमत्रैतदेवान्तरम्, यदनया धारणया काव्यशास्त्रे सिद्धान्तरूपं न धारितम्। कथम? भारतीयकाव्यशास्त्रजीवितस्य - रससिद्धान्तस्य प्रातिकूल्यात्‌अभावात्मकान्येकद्वानि समाधानानीतराण्यपि सन्ति। परं तेषां पृष्ठतः कश्चिद् गम्भीरो विचारस्तर्को वा नास्ति। यथा ह्यूमड्यूबाययोर्मतेन प्रेक्षकस्त्रासदावलाकनाध्ययनयोर्नैत्यिकजीवन- रसतवान्मुक्तिमाप्तुं प्रवर्तते। त्रासदया तज्जीवने काचिदुत्तेजना प्रविशति, भवतु नाम भयं शोको वा तदाधारः। यतो 'ह्युद्वेगाद्दुःखभोगेऽधिक रसः' इति मन्तव्यस्य पृष्ठत उत्तेजनासिद्धान्तो वर्तते। उत्तेजनायाम्-भवतु नाम सा कथं न कटुरेव-कश्चिद्वदानन्दविशेषः प्रविशति। अनपेक्षितोक्तिरियम् यदयं विंचारो नास्ति बहुसारः। अयं ह्युत्तेजनाऽऽनन्दयोरतिस्फुटमप्यन्तरमुपेक्षते। असन्दिग्धमिदम्, यद्वयं बहुधा स्वकीयायाः सामान्याया दिनचर्याया उद्विज्योत्तेजितक्षणान् कामयामहे, परमिदममाननीयम् यज्जीवने वास्तविक्या उत्तेजनाया इयती न्यूनतास्ति यन्मान काल्पनिक्या उत्तेजनायाः कृते प्रेक्षागृहाणि गच्छेत, नाप्युत्तेजनानन्दपर्याय एव। शोकत्रासजन्यायामुत्तेजनायामानन्दस्य

कल्पना तु कथमपि स्वस्थायां मनःस्थितौ न सम्भवति। अस्ति चैकमिदमपि तर्कान्तरम्-यत्काव्यनाट्ययोः शोकभयादिभावस्तत्सम्पृक्ताः परिस्थितयश्चवायथार्था भवन्ति। अतो वयं तत्कारणकं क्लेशं नानुभवामः, प्रत्युत कलाकौतुकेन कञ्चिच्चमत्कारं प्राप्नुमः। वस्तुतो धारणेयं कलां कौतुकस्तरेऽवतारयति, साधारणीकरणसिद्धान्तं च प्रतिषेधति। यदि सामाजिकः काव्यनाट्ययोरयथार्थतां प्रति निरन्तरं प्रबुद्धोऽस्ति। तदा तु तादात्म्यं कथमपि न सम्भवति, तादात्म्यं विना च कीदृशी रसनिष्पत्तिः। अथ कतिपयान्येवंविधानि समाधानानि विचारयिष्यामः, येषामाधारो भावात्मकः, यानि च निश्चयेन गम्भीराणि महत्वशालीनि च सन्ति। निकोलेन स्थापितमूयत्त्रासदायां मानवहृदयस्य शौर्यौदात्यादयो भव्यतरा गुणाः प्रदर्श्यन्ते, वीरतायाः पतनेऽपि कश्चिद्द्र गरिमा निहितो भवति। यः शोकत्रासौ दिव्ययाऽऽभया मण्डयति, एवंविधप्रसंगसाक्षात्कारोऽस्मन्मनसि क्लेशं नोत्पादयति, प्रत्युतैकामुदात्तामनुभूतिं जनयति, या नियमेन सुखदा प्रीतिकरी वा भवति। नीत्शेमतमस्मात्किमपि भिद्यते। तदनुसारेण त्रासदायां जीवनस्य प्रकाशान्धकारयोरुभयोरपि किञ्चिदूर्जस्वि चित्रणं तिष्ठति। प्रेक्षको जीवनस्यैनां द्वन्द्वात्मिकां शक्तिमनुभवन् त्रासदारसं गृहणाति। प्रसिद्धो दार्शनिकश्चव हीगेलोऽपि द्वन्द्वमिदं स्वीकरोति। परं तस्य कृते द्वन्द्वमिदं साधनमेव, न सिद्धिः।

आनन्दकारणं न द्वन्द्वम्, प्रत्युत चेतनायाः सा भव्यतरा समाहितिरेवानन्दकारणम्, याऽनेन द्वन्द्वेनान्ततः सिद्ध्यतीत्यर्थः। विंश्यां शताब्याम् आई० ए० रिचर्ड्सो हीगेलस्य रहस्यवादिकाव्यसिद्धान्तमाक्षिपन्नपि प्रायेणेदमेव तथ्यं मनोवैज्ञानिक्यां शब्दावल्यां प्रास्तौत्। तन्मतेन काव्यस्योद्देश्यमन्तर्वृत्तीनां सामञ्जस्यमस्ति, यच्च काव्यरूपमाधिकाधिकानां विभिन्नानामन्तर्वृत्तीनां समञ्जने यावत्सफलीभवति। तस्य तावदेव कलात्मकं मूल्यं माननीयम्। त्रासदाया आधारभूते अन्तर्वृत्ती, करुणात्रासौ स्तः मिथः सर्वथा विपरीते। यतो ह्याकर्षणं करुणाधर्मः विकर्षणं च त्रासधर्मः स्वभावा देवानयोः सामञ्जस्यं कठिनतरम्, तेनैव चानुपातेन परिपूर्णतरमपि भवति। अन्तर्वृत्तिसमञ्जनेन च नियमेन परितोषः प्राप्यते। अतस्त्रासदाप्रभावोऽपि परितोषकर एव भवति न क्लेशकरः। यद्यपीदं समाधानं पुष्टतरं युक्ततरञ्चास्ति, तथापि नैतेन जिज्ञासोपशाम्यति। निःसंशयमिदम्-यत्कस्यचिद्द्र वीरस्य बलिदानमस्मच्चित्तेऽवसादनैराश्ययोः सीने उदात्तभावना उद्बोधयति किन्त्वनेनैकाकिना तर्केण समस्या न समाधीयते। एकतस्तु तर्कोऽयं प्रतिस्थिति न संगच्छते, अपरतश्चव त्रासदायामेकाकिनो वीरस्यैव बलिदानं न भवति, प्रत्युत निरीहसरलसुन्दराणामपि व्यक्तीनां निर्ममभुत्पीडनं हननञ्च भवति। सत्यमिदं यन्महापुरुषान् प्रति नश्चवेतसि दया नोदेति, परं तेषां शोकपतने कस्याञ्चिदपि परिस्थितावस्मान्न परितोषयतः। अस्मन्मनस्युत्साहः सञ्चरति, उदात्तभावनास्तदान्दोलयन्ति, परं शोको न निवर्तते। आधुनिकयुगस्य आंगललेखको

ल्यूकसोऽपि मतान्तराणि निराकुर्वन्नपि नीत्शेमतेनान्तः सहमतिं प्रकाशयति। तस्यायं तर्कः-यत्त्रासदा जीवनोत्थानपतनयोरूदात्तं चित्रमस्माकं पुरस्तात्प्रस्तौति। येन वयं जीवनसत्यस्य तदीये भव्यतमे रूपे रसमास्वादयामः। इदमपि समाधानमांशिकरूपेणैव वयं स्वीकर्तुं प्रभवामः। जीवनसत्यस्य हि समग्ररूपस्य रसास्वादनक्षमता सामान्यसहृदयस्य न भवति। जीवनस्योत्थानेन सह पतनस्यापि केवलेन तदौदात्यस्य बलेन प्रीतिकरत्वं भ्रन्तुं नास्ति पर्याप्तं कारणम्। वास्तविके हि जीवने एतादृशप्रसंगेभ्यः प्रेरणां गृहणन्तोऽपि वयं तदावृत्तिं न कामयामहे, यदा साहित्ये एवंविधप्रसंगप्रेक्षणमनतेच्छासर्वस्य बोभवीति। एकेन दृष्टान्तनाहं स्वमन्तव्यं स्फुटीकर्तुमर्हामि। गान्धिनो बलिदानमाधुनिकस्य भारतीयजीवनस्य महतता प्रेरिका घटनास्ति, किन्तु सा प्रीतिकरी न संभवति। तदावृत्तिं कामयितुं वयं न प्रभवामः। तस्या औदात्येन दुःखदंशोऽशतोऽवश्यं न्यूनीकृतः, न तु नाशितः। सुखे परिणमनस्य तु वार्तेव का? एतस्माद् हीगेलस्य तर्कः प्रत्ययकारितरः। त्रासदायां जीवनस्य जयपराजययोर्द्वन्द्वस्यानुभवोऽस्मच्चेतनायाः मिथोविरोधिनीर्वृत्तीरुद्बोध्यान्ते समञ्चाति, परिणामतोऽस्मदात्मा समाधीयते। मूलद्वन्द्वं यावत्प्रबलं तीव्रं च भवति, आत्मनः खल्वियं समाहितिस्तावदेव परिपूर्णा गहना च भवति। अतः काव्यस्य रूपान्तरेभ्यस्त्रासदया प्रेक्षकाणामात्मन्यधिकः परितोषो भवति। रिचर्ड्सेनात्मनः स्थाने चेतना शब्दं प्रयुज्यै तत्समाधानं बुद्धिग्राह्यतरीकृतम्। यद्यपि ल्यूकसादिलेखानुरूपं रिचर्ड्सस्य विवेचनमरस्तूमतं शब्दरूपेण न प्रस्तौति, तथापि न तदमान्यम्। अत्र स्पष्टतमो दोषो ममप्रतिभाति यदत्र कथमित्यपेक्षया किमित्यस्य विवेचनमधिकमस्ति। त्रासदा हि सर्वथाविरोधिनीराकर्षकविकर्षिकाः वृत्तीः समञ्जस्य चेतनां समाधत्ते। अतस्तस्याः प्रभावस्तृप्तिकरः, इदं तु यथार्थम्। किन्तु समञ्जनमिदं कथं घटते, अस्य समाधानमप्यावश्यकतरम्, यतो मूलसमस्या त्वयमेव यद् दुःखस्य सुखे परिणतिः कथं भवतीति।

इत्थं सार्धद्विसहस्राब्द्याः प्राच्यपाश्चात्यावा प्राचीननवीना वा विचारकाः प्रश्नेऽस्मिन् कलहायमानाः सन्ति। परमद्याप्यसौ तत्रैवास्ति। किमप्यविवाद्यं सर्वमान्यञ्च समाधानमद्यापि नोपलब्धम्। उपर्युक्तविचाराणां विश्लेषणेन निम्नांकिता निष्कर्षाः प्राप्यन्ते।

प्रायः सर्वेषु तर्केषु सत्यांशो नियमनैव विद्यत–परहिंसारससिद्धान्तेऽपि। भेदस्तु मात्रायाः केचित्तर्काः परापेक्षया ग्राह्यतराः सन्तीत्यलम्।

किञ्चिदपि समाधानं सर्वथा पूर्णं नास्ति, यज्जिज्ञासायाः सामग्र्येण परितोषं कुर्यात्। यदि भवान् पूर्णतयास्तिकः आत्मन आनन्दरूपताया भवतोऽवितर्क्यो विश्वास इत्यर्थः। तदा त्वभिनवगुप्तोक्तं समाधानं पर्याप्तं स्यात्। किन्तु वाक्येऽस्मिन् यदीत्यनुबन्धो न सुगमः, ईदृशो हि विश्वासः कियतां सम्भवति, कथं च सम्भवति। सामान्यस्य तर्कशास्त्रस्य मनोविज्ञानस्य चाधारेण

भट्टनायकस्य तर्कः (संविद्विश्रान्तिसत्वोद्रेकादिधारणावर्जमपि) परमगम्भीरः। पाश्चात्यैर्विचारकैरनेकशः स्वस्वशैल्याऽयमभिव्यञ्जितः प्रतिध्वनितश्चव। यस्मिन् सिद्धान्ते वस्तुतः कलात्मकसमाञ्जस्यसाधारणीकरणसिद्धान्तयोः संयोगोऽस्ति, यत्कदाचित् प्रस्तुतप्रश्नस्य सर्वतोऽधिकविश्वसनीयं समाधानं विद्यते।

वस्तुतो जिज्ञासां सम्परितोषयितुमस्माभिः कतिपयेषां सिद्धान्तानामाश्रयेणैकं मिश्रसमाधानं प्रस्तोतव्यम्-अनेकानि हि कारणानि समेत्यैव दुःखं सुखीकर्तुमर्हन्ति। काव्यशोको न प्रत्यक्षानुभवगोचरः, अपितु कल्पनानुभवगोचरः। कल्पनाप्रभावात्तस्य दंशः शिथिलीभवतीति न संशयः। काव्यशोको न व्यक्तिगतः, अपितु साधारणीकृतः। अतो ममत्वजे कुण्ठानैश्ये तत्र न भवतः। व्यक्तिसंसर्गे रागद्वेषादिभिर्मुक्ता चेतना वैशद्यमेति, तद्वैशद्यं नूनमेका सुखकरी मनःस्थितिः। करुणकाव्यैः करुणा प्रायेण महापुरुषैः सम्बध्यते, महत्वसम्बन्धेन शोकादीनां लघुत्वं नश्यति, ते चौदात्येन मण्डिता भवन्ति। अमीषुं करुणदृश्येषु बहुधा मानवशौर्यगरिम्णोर्भव्यं निदर्शनं भवति। यत्सामाजिकस्य चेतनामुत्कर्षयति। उत्तररामचरिते रामस्योदात्तकर्तव्यभावना तस्य व्यक्तिगतं दुःखं गरिमातिशयेन मण्डयति। एवंविधाः प्रसंगा जीवनस्य गम्भीरं पक्षं पुरः स्थापयन्ति। एतेन सहृदया गहनतरजीवनतथ्यसाक्षात्कारावसरं विन्दन्ति। अयं च तथ्यसाक्षात्कारो नूनमेकोपलब्धिः, ययाऽऽत्मोत्कर्षति। इत्थं करुणप्रसंगैर्गम्भीरो जीवनरसः सिद्ध्यति। अन्ते च कलाप्रक्रिया दुःखादिलेशमपि नाशयति, कलाप्रक्रिया हि वैविध्यसमाहितिप्रक्रिया। विकीर्णोपकरणसमञ्जनेन हि कलाकारोऽनैक्येप्यैक्यं स्थापयति। विरूपमपि सुरूपयति। इयमेव कलात्मिका समन्वितिः, रागात्मिका धारा, भेदेऽभेदप्रतीतिः। भेदेऽभेदप्रतीतिश्चव नूनं सुखकर्यनुभूतिः। अत्र सन्दर्भेऽहं स्वकीयमेवैकमुद्धरणं प्रस्तोतुं प्रवृद्धं लोभं संवरीतुं न शक्नोमि—'अनुभूतेराधारा भवन्ति, संवेदनानुभूत्योर्न किञ्चिदेकं संवेदनान्तरम्, अपि त्वेकं संवेदनानां विधानं भवति। संवेदनेषु सामञ्जस्येऽन्वये च स्थापितेऽस्माकमनुभूतिः सुखकरी भवति। विशृंखलतया च विकीर्णेषु तेष्वनुभूतिः कटूभवति। काव्योपसन्नानि संवेदनानि न प्रत्यक्षाणि, अपितु सूक्ष्मबिम्बरूपाणि भवन्ति, तत एव तेषां कटुतात्यन्तं क्षीयते। किञ्चैतानि कविभावितानि भवन्ति। अतोऽनिवार्य तया तेषु सामञ्जस्यं स्थाप्यते। काव्यभावनार्थो हि अव्यवस्थायां व्यवस्थापनम्, अव्यवस्थायां व्यवस्थैव चानन्दः। इत्थं जीवनस्य कटवोऽप्यनुभवाः काव्ये स्वाधारभूतैः संवेदनैः समन्वयनेनानन्दप्रदा जायन्ते।करुणरसस्य सुखमयास्वादस्य विषमा समस्यैवमेव समाधातुं शक्यते। अहं तावदात्मजिज्ञासामेतेनैव रूपेण पोषयितुं प्राभवम्।

साधारणीकृतेः सूते शोकादिः काव्यकौशलात्।

## ख-रससिद्धान्तस्य मनोवैज्ञानिकम् विवेचनम्--

मनोविज्ञानं रसमर्म्मावगन्तुं यतमानमवेक्ष्यते। तद्बोधतत्वं विनिवार्य भावनामुद्रेकं रसमवगच्छति। परमिदमपि न पूर्णतया युक्तम्। रसस्यानुभूत्यां बुद्धेरालोको भावानाञ्चोद्रेकः प्रतीयेते।अध्यात्मवादिनो रसविवेचनायां चित्तस्य वा चितेर्दशाः स्वीकुर्वन्ति परमिदमपि सत्यं रसः श्रद्धाव्यात्मिकी अनुभूतिरपि न तत्र इन्द्रियसंस्पर्शज-शरीरज-मनोबुद्ध्युत्पन्न-तत्वानि अपि निवसन्ति।
तत्र सुन्दरतायाः साक्षात्कारो भवति, अतः केवलाध्यात्मिकदृष्ट्या रसविवेचनं नोपादेयं भवितुमर्हति। वस्तुतो रसस्य कलादृष्ट्यापि विचारो भवितुं शक्यः।

संस्कृतकाव्यशास्त्रिभिर्यद्यपि शृंगाररसो 'रसराजो' वा रित्येतेनोपाधिना न सम्मानितः परं तैरन्येभ्यो रसेभ्यो स उत्कृष्टमोऽमानि। भरत-रूद्रटप्रभृतयो रसस्योत्कृष्टमतां स्वीकुर्वन्तो यदावलोक्यन्ते, तदाग्निपुराणकारो भोजराजश्च शृंगारे तादृशीमेव धियं दधानौ प्राप्येते। रामचन्द्रगुणचन्द्रावप्येतां मान्यतां पर्यपूषतामिति कथितमुपर्यति शृंगाररससन्दर्भे।भरतः स्वकीये नाट्यशास्त्रे रूपकाणां निरूपणं विदधद् 'रसो रूपकाद् रूपकञ्च रसात् न पृथगवस्थातुं शक्नोति। रूपकमनिवार्यतया रसमपेक्षते। रसादे वा रूपके रूपकत्वं सञ्चरते। तत्सद्भावादेव रूपकं रूपकतां प्रपद्यते' इदं हि विशदतयोपपादयन् रसस्य स्वरूपं तदीयां महनीयताञ्च प्रदर्शयन्नवाप्यते। नाट्यशास्त्रे रसविकल्पभावव्यञ्जकाख्यषष्ठसप्तमाध्याययोः रसे भावे कृत्स्नतया प्रकाशो भरतेन क्षिप्तोऽस्ति। तयोःरसभावयोः पारस्परिकः सम्बन्धश्च तेन निर्दिष्टोऽस्ति।

यथाम्लपदार्थसंयोगेन पयो दध्नि परिणमते तथैव स्थायिभावोऽपि विभावानुभावसञ्चारिसंयोगाद् व्यक्तो भूत्वा रस इति नाम्ना व्यवह्रियते। इदमित्थमपि वक्तुं सुकरं यथा वासनात्वेन स्थिता रत्यादिकास्तावदेव स्थायिभावा यावत्ते विभावादिभिश्चर्व्यमाणा न भवन्ति। चर्व्यमाणा भूत्वा तु ते रसा जायन्ते। स्थायिभावानां रसरूपेणाभिव्यक्तिस्तथा न भवति यथा ध्वान्तस्थस्य घटस्य। सः प्रकाशमपेक्षते। परमन्धकारस्थोऽनन्धकारस्थश्च घटो न भिन्नः। एक एव। पर वासनात्मकतया स्थितः स्थायिभावश्चर्व्यामणात् स्थायिभावाद् भिन्नः। प्रथमः स्थायिभाव इति कथ्यते, द्वितीयश्च रस इत्युच्यते।

लोके ये पदार्था सामाजिकस्य मानसे वासनात्वेन स्थितानां रत्युत्साहशोकादिभावानामुद्बोधककारणत्वेन मता भवन्ति, ते काव्ये नाटकादिषु च वर्णिता यदा भवन्ति तदा 'विभाव' इत्येतया संज्ञया प्रोच्यन्ते। साहित्यदर्पणकार आह—

'रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः'4

विभावस्यार्थोऽस्ति कारणम्। विभावाः सामाजिकस्य हृदये स्थितान् रत्यादिस्थायिभावानुद्बोधयन्ति, ते तान् विभावयन्ति, तान् आस्वादार्हतां नयन्ति।

अनियतरसेषु प्रयुक्तत्वात् स्थायिभावानाम् सत्सु च तेषु इतररससहायकेषु सा आस्वाद्यता नावशिष्यते या नियतेषु रसेषु विद्यमानत्वात् तेषां, तेष्वास्वाद्यतानुभूयते।काव्येवर्णितानां रामादीनां तत्तच्चरित्रमाकर्ण्याधीत्य वा किञ्च रूपकेषु दृश्यमानानां पात्राणां तं तं व्यापारं प्रेक्ष्य श्रोतुर्वा द्रष्टुः सम्बन्धः साधारण्यं प्रतिपद्यते, कृत्स्नतया सर्वविधोऽपि भेदभावो विलुप्तः सञ्जायते, अध्येता वा द्रष्टा द्वावपि अहममुकः स चामुक इत्येतत्, सर्वमपि विस्मरतः, एतत्सर्वमपि तस्य ध्यानपथात् स्रंसते। काव्ये सीतारामादीनां तत्तच्चरित्राण्यधीयानः किं वा नाटके दुष्यन्तशकुन्तलादीनां येषामभिनयं नटः कुरुते, दर्शनकाले द्रष्टा 'अहं काव्याध्येता वा नाटकस्य द्रष्टास्मि, अयं रामः अयं नटः, अयं नटो दुष्यन्तस्याभिनयं करोति' त्यादिकं सर्वं विस्मृत्य लोकोत्तरैक्यविषयकानन्दे निलीयते। एतस्यां स्थित्यां केवलानिर्वचनीयानन्दवर्षिणा रसेनानुगृह्यते सः। इदं हि दिव्यमैक्यं साहित्यशास्त्रे साधारणीकरणमिति परिभाष्यते।

साधारणीकरणेन समुपस्थाप्यमानाभ्यो विभावादिसामग्रीभ्य उद्बुद्धा भवन्ति सर्वे च वासनारूपेण स्थिता रत्यादिस्थायिभावाः। ततश्च ते तन्मयीभावा ब्रह्मास्वाद इव आनन्दाधायका भवन्ति। सामाजिकास्तदुपभोगावसरे नितान्तमेव वेद्यान्तरसम्पर्कशून्या सञ्जायते। एतस्य रसस्यानुभूतिस्तावदेव भवति, यावद् विभावादीनां त्रयाणामपि भवति प्रतीतिः। विभावादीनां रसस्य च प्रतीत्यां कारणकार्यरूपपूर्वापरसम्बन्धो नास्ति, अपि तु द्वयोरपि प्रतीत्योरकत्र युगपदवस्थान जायते। अतः साहित्यशास्त्रस्य भाषायां रसः समूहालम्बनात्मको मतो भवति। साहित्यदर्पणकार इह वदति—'यस्मादेष विभावादिसमूहालम्बनात्मकस्तस्मान्न कार्यः'।

रसास्वादप्रक्रियायां यद्यपि विभावोऽनुभावो व्यभिचारिभावश्च खण्डशः प्रतीतिपथमुपसरन्ति परमेषां खण्डशः प्रतीतिस्त्वरिगततित्वाल्लक्षिता न भवति। रसप्रतीत्यां ते त्रयोऽपि अखण्डाः परस्परसंश्लिष्टाश्च ।भवन्तः स्वां सिथतिं निदधाति। अस्मादेव कारणाच्च रसचर्वणायां विभावादीनां मध्ये कस्यचनैकस्य सर्वाधिकत्वेन सर्वातिशयाच्छादकत्वेन च प्रतीतिर्न मतास्ति। रसास्वादे प्रपाणकरणसन्यायेन तेषां त्रयाणामपि संश्लिष्टा विचित्रा अवर्णनीया च प्रतीतिरुद्भवति। अत्राचार्यो विश्वनाथः साहित्यदर्पणे तृतीयपरिच्छेदे ब्रूते—

ततः सम्वलितः सर्वो विभावादि सचेतसाम्।
प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत्।।'5

काव्यप्रकाशेऽपि वृत्यामुक्तम्—

'यद्यपि विभावानामनुभावानां—व्यभिचारिणां केवलानामत्र स्थितिः, तथाप्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षपकत्वे सति नानैकान्तिकत्वमिति।'

रसस्य काव्यानन्दस्य प्रतीतिं सचेतसः सर्वे समानभावेन कुर्वन्ति न वा इत्येतस्मिन् विषये व्यावहारिकी भुवं संस्पृश्य चेद् विचारो विधीयते तदा प्रतीयते यत् काव्यस्य पठने श्रवणे वा किं च नाटकस्य दर्शने एकैकः सहृदयो रसं न समानभावेनास्वदते, प्रत्येकस्य सहृदयस्य मनःस्थितेर्भिन्नत्वात्। प्रतिसहृदयस्य जनुर्जाताः संस्काराः न तुल्या भवन्ति, किञ्च वातावरणजन्यास्वपि परिस्थितिषु तारतम्यं दृष्टं भवति। अत एव न प्रतिसहृदयः समानभावेन काव्यानन्दमुपभुनक्ति।

काव्यनाटकगता विभावादिकाः समाना एव सर्वेषां पुरो यद्यपि प्रस्तुता भवन्ति, परं तथात्वेऽपि रसानन्दप्रतीत्यां भेदः प्राप्यते। अतोऽत्र भरतस्य सूत्रे विभावादिकानां तात्पर्यं काव्यनाटकगतविभवादिषु न, अपि तु तेषु विभावादिषु तदीयं तात्पर्यं ये विभावादिकाः काव्यनाटकगतविभावादिभ्यः सहृदयहृदयनिमित्ते प्रतिबिम्बित रूपं परिगृह्णन्ति। एतस्मात् प्रतिबिम्बितविभावादिकारणात् प्रत्येकः सहृदयोऽभिन्नमेव काव्यानन्दमाप्नोति।

रसस्यास्वादत्वे च भरतस्य वाक्यानां सार इह निधीयते यो हि द्रष्टव्योऽस्ति—यथा हि नानाव्यञ्जनौषधादिद्रव्यसंयोगाद् रसो निष्पद्यते तथैव नानाभावोपगतत्वात् स्थायिभावानां, तेभ्यो रस उत्पद्यते वा ते रसत्वे परिणता जायन्ते। यथा नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वदन्ते, हर्षादिकं चानुभवन्ति तथैव भावाभिनयाभिव्यक्तीकृतान् वागंगसत्वोपेतान् स्थायिभावान् सहृदया आस्वादन्ते, प्रीत्यादिकञ्चानुविन्दन्ति।

अभिनवमतेन काव्यगतविषया असम्भवा इत्येतन्मन्यमानो जनो न कदापि रसमास्वादयितुं क्षमः। लोकसामान्यविषययोजनायां प्रायेण व्यक्तिहृदयसंवादः संघटते, अतस्ते रसमनुभवितुं प्रभवन्ति।

भरतोऽपि हृदयसंवादिनोऽर्थस्य रसजनकतां प्रतिपादयति—

योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः।<br>
शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निना।।6

कियद्भिरेव पुण्यात्मभिर्ज्ञातृभिर्जनैस्तादृशमधुरकाव्यश्रवणाध्ययनवशेनआ- विर्भूताद् विभावादिसमूहालम्बनात्मकत्वादेक एवात्मवेनैव प्रकाशते। न तु स ज्ञानान्तरप्रकाश्यः। अस्ति स आमोदरूपं ज्ञानम्। तदानन्दानु- भूतिकालेऽन्यस्य ज्ञेयपदार्थस्य न सम्पर्को भवति स्तोकमपि। आनन्दमयत्वात् स ब्रह्मानन्दसहोदरत्वाय कल्पते। अस्ति स लोकोत्तरचम- त्कारचारुः। स निजशरीरमिवैकत्वेनानुभूयते। यथा देहात्मानौ वस्तुतो भिन्नावपि 'अहं यामि'—इत्यभिन्नत्वेन प्रतीयेते, यथा नायकादीनां नायिकादिगतरत्यादितः स्वस्वरत्यादिराश्रयादिभेदेन भिन्नोऽपि तथाविध- वाग्भङ्ग्यादिव्यापारसामर्थ्यादभिन्नत्वेन सामाजिकैः प्रतीयते।

काव्यानन्दस्य रसस्य स्थितिरेकतो लौकिकभावनागता वर्तते, एकतश्चाध्यात्मिकक्षेत्रगता। लौकिकभावना मानवे सुखं दुःखञ्चोत्पादयति। परमितो

रसो यद्यपि लौकिकसाधनसमुद्भूतः परं सः सुखस्वरूपः सुखात्मको भवति। इदं तु सुखं न भवति सामान्यम्। भवति तदसामान्यमेव। अत एव तल्लोकोत्तरमित्युच्यते। आध्यात्मिकक्षेत्रगत आनन्द उभाभ्यामपि लोकानन्दात, काव्यान्दाच्च आनन्दाभ्यां विलक्षणो भवति। वस्तुतः इदमेव सुखमलौकिकं भवति। तदेवमानन्दस्त्रिषु भेदेषु विभक्तः कर्तुं शक्यः—

(1) लौकिकानन्दः (इन्द्रियानन्दः)

(2) काव्यानन्दः

(3) ब्रह्मानन्दः

प्रथम आनन्दः सांसारिकपदार्थपरको वर्तते। द्वितीयः आनन्दः काव्यध्ययनश्रवणाभ्यां नाटकस्य च दर्शनात् प्राप्तो भवति, एष एव काव्यानन्द इति कथ्यते। तृतीयश्चानन्दो ब्रह्मनिष्ठो भवति, योगिभिः स उपलभ्यते। एष परमार्थतो, ब्रह्मानन्द आनन्दो भवति न स लौकिकमानन्दं मनागपि स्पृशति। यथा लौकिक आनन्दो वृत्तिगतो भवति तथा ब्रह्मानन्दो वृत्तिगतो न भवति। तत्प्रतीतिस्तु वृत्तिशून्यावगन्तव्या। काव्यानन्दो लौकिकानन्दब्रह्मानन्दोभयमध्यस्थितो भवति। परमुन्मुखता तु तस्याधिक्येन ब्रह्मानन्दम्प्रति दृश्यते।

ब्रह्मानन्दमधिकृत्य परमपरिमितशब्दैः कथनमिहोपयुक्तं स्यात् ब्रह्मानन्द आत्मनः स्वरूपमस्ति। तदभिव्यक्तिस्तुरीयावस्थायां भवति। तदवस्थायां विषयी विषयश्च एक एव, न भिन्नः। द्रष्टा दृश्यमानः पदार्थश्चैकस्मिन् सम्पूर्णे ब्रह्मणि समवेततां प्राप्नुतोऽतस्तावेकाकारतां प्रपद्येते। एतद्विधत्वादेव तत्प्रतीतिर्वृत्तिशून्यत्वमाम्नातम्। तत्प्रतीतेरर्थोऽस्ति ज्ञान-प्रेम-सौन्दर्याणां जीवितं समष्टिरूपमैक्यम् तस्यानुभूतिरेव 'आनन्द' इति गीयते। तदनुभवानेहसि 'कोऽहम् किमपि च तत्, कोऽयमत्र प्रपञ्चः' इत्येतदादिकं सर्वमपि' विलीयते। एतस्यानन्दस्यैतद्विधत्वादेव न तत्समः कोऽप्यानन्द इति।यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचनेति।स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः।लोकस्थपदार्थानवलम्बितत्वात्, कविप्रतिभाजन्यकल्पनामयपदार्थाश्रितत्वाच्च काव्यानन्दो विषयानन्दात् (लौकिकानन्दात्) एकान्ततोऽतिशयदूरे आस्ते। काव्यानन्दस्य वैशिष्ट्यमिदम्—तत्र लोकतत्वानि साधारण रूपं परिगृह्णन्ति। तत्तद्विधगुणसम्पन्नत्वात् सोऽस्ति सार्वभौमोदात्ततमोत्तुंगतमभावभूस्थितः। काव्यानन्दोऽयं ब्रह्मानन्दाद् विलक्षणः। एकतस्तु स ब्रह्मानन्दस्य विशिष्टांश इव। एकतश्च स रतिशोकोत्साहादिविभिन्नोपाधिषु विभक्तो भवितुमर्हति।

त्रिविधानामप्यानन्दानां पारस्परिकवैषमयविशिष्टत्वे हेतुरयम्—

लौकिकानन्दे मानवस्य रजोगुणस्तमोगुणश्च सम्पृक्तोऽस्ति। तत्र सत्वगुणोऽभिभूतः सन् अवतिष्ठते। 'रस' इत्येतेन नाम्ना प्रथिते आनन्दे तु रजस्तमश्चाभिभूते भूत्वा सन्तिष्ठेते, सत्वगुणस्तु भवति समुद्दीप्तः।

द्वयोरप्येतयोर्लौकिकानन्दकाव्यानन्दयोः सर्वेऽपि सत्वादिगुणा न्यूनाधिका भवन्तः। समुज्जृम्भन्ते परमाध्यात्मिके आनन्दे ब्रह्मानन्दे केवलं सत्वगुणश्चकास्ति दीप्यते। च। द्वावपि रजस्तमोगुणौ तत्र स्वस्थितिं निधातुमीशाते अतोऽयमलौकिको ब्रह्मानन्दो द्वावप्यानन्दौ अतिशयाते, तौ द्वावप्यानन्दौ पराभूय स ब्रह्मानन्दो विद्योतते। रजस्तमोगुणौ तद्दिशि पदमप्येकं निधातुं न क्षमेते। अतोऽयं ब्रह्मानन्दो द्वाभ्यामपि ताभ्यामानन्दाभ्यां गरिष्ठः।

रसो न कार्यो न च ज्ञाप्यः। न च स निर्विकल्पकं ज्ञान, न च सविकल्पकं ज्ञानम्। अस्मिन्नेव प्रसंगे काव्यप्रकाशकार आह—

'स च न कार्यः, विभावादिविनाशेऽपि तत्सम्भवप्रसंगात्। नापि ज्ञाप्यः सिद्धस्य तस्यासम्भवात्। अपि तु विभावादिभिः व्यञ्जितश्चर्वणीयः।

रसस्याकार्यत्वेऽज्ञाप्यत्वे सति नान्यः कोऽपि हेतुस्तत्र सम्भवः। हेतू द्वावेव भवतः कारकहेतुः, ज्ञापकहेतुश्च। तस्य तद्विधत्वाद् उक्तावेतौ द्वावपि हेतू न तत्र संगच्छेते। अत्र काव्यप्रकाशकारो ब्रूते—

'कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् न, क्वचिद् दृष्टिमित्यलौकिकत्वे सिद्धे भूषणमेतन्न दूषणम्।

आशयोऽयम्, रसस्य व्यञ्जकाः भवन्ति विभावादयः। न कारकज्ञापकहेतू तस्य व्यञ्जकौ भूत्वा प्रवृत्तौ भवितुमर्हतः। एतद्विशिष्टतावशादेव रसोऽलौकिक इति कथ्यते। लोके कारकज्ञापकाख्यौ यौ द्वौ हेतू प्राप्येते ताभ्यां द्वाभ्यामपि विभावादिहेतुर्विलक्षणोऽत एव तस्यालौकिकत्वं सिद्ध्यति।निर्विकल्पसविकल्पकज्ञाने न तस्य (रसस्य) ग्राहके इत्येतस्मिन् विषये मम्मटाचार्यः स्वकाव्यप्रकाशे चतुर्थोल्लासे शंसति—'तद् ग्राहकं न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वाद्। नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभावरूपस्य ह्युभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति, न तु विरोधमिति श्रीमदभिनवगुप्तपादाः।''नामजात्यादियोजनासहितं ज्ञानं सविकल्पकम्। यथा घटपटादिपदार्थानां ज्ञाने तत्स्वरूपेण सह वस्तुनो नामजात्यादिकस्यापि भान भवति, अतो घटपटादिकानां ज्ञानं सविकल्पकज्ञानमिति कथ्यते। भवति च तच्छब्दव्यवहारगोचरम्। परं रसानुभूतिस्तु स्वसंवेदनमात्ररूपा, न शब्दव्यवहारस्य विषयो भवति। अतस्तत्र नामजात्यादिकानां कृतेऽवसर एव। रसस्यैतद्विशिष्टत्वात् सा सविकल्पज्ञानेन न ग्राह्या।

सविकल्पकज्ञानाद् भिन्नं निर्विकल्पकं ज्ञानं भवति। नामजातिविशेषणविशेष्यभावादिरहितकेवलवस्तुमात्रावगाहि ज्ञानं निर्विकल्पकं ज्ञानमिति कथ्यते। अत्रोक्तिरियं प्रसिद्धा 'बालमूकविज्ञानसदृशं निर्विकल्पकं।' विषयोयमुदाहरणद्वारेण विशदतया स्फारीक्रियते—आंग्लभाषायां रसानुभूतिः "Aesthetic experience or poetic pleasure" इति कथ्यते।

तत्स्वरूपमधिकृत्य प्रतीच्यानां प्रथ्यां मन्तव्यानी दृशानिः—प्लेटो रसस्यानुभूतिरिन्द्रियलभ्येति मनुते। स बुद्धिम् आत्मानञ्च भिन्नं मन्यते। न तद्विचारेण तयोरैक्यम्। अतः स द्विविधामनुभूतिं स्वीकुरुते। ते स्त इमे–(1) आध्यात्मिकी अनुभूतिः (2) इन्द्रियगोचरानुभूतिः। तन्मतेन आध्यात्मिकी अनुभूतिर्वा सौन्दर्यानुभूतिस्त्वात्मानुभव एव। परं काव्यानुभूतिरिन्द्रियानुभवो वर्तते सः काव्यानुभूति सौन्दर्यानुभूतेर्गरीयसीमगच्छति। अस्ति सा अनृता, अस्वास्थ्यकरी च।

अरस्तुर्दार्शनिको हि काव्यानन्दमाध्यात्मिकं न मत्वा ऐन्द्रियमेवावगच्छति।9 न तन्मतेन सोऽश्रेष्ठ इत्येतद्धेतोस्तं न सोऽवजानाति। स मनीषी काव्यानन्दं प्रत्यक्षेन्द्रियज्ञानात् सूक्ष्मतरं ज्ञानं मन्यते।

'काव्यानन्द आध्यात्मिक' इत्येतस्या मान्यतायाः प्रवर्तयितास्ति प्लोटिनसः। कला प्रकृतिमनुसरतीत्येतं प्लेटोसम्मतं निर्णयं नायं प्लेटोनिस आद्रियते। प्रकृतिर्ज्ञानस्य (आत्मनः) अनुकृतिरस्ति। कला (काव्यकला) चेदनुकृतेरप्यनुकृतित्वेन मता स्यात् तदा सा (कला) अनृता अस्पृहणीया चोक्ता स्यात्।10 वस्तुतः कलायाः (काव्यस्य) प्रकृतेश्च द्वयोरप्युद्भवो ज्ञानाज्जायते, अत एव कलाजनितानन्दोऽप्याध्यात्मिको वर्तते।भारतीये काव्यशास्त्रे रसो ब्रह्मानन्दसहोदरत्वेन मतो न च ब्रह्मानन्दः। परं तादृशः सन्नपि सोऽलौकिको मतः। लौकिकविषयपरिधिगतो न रसस्तस्मात् तत्रालौकिकत्वमेवापादयितुं स्वस्थ सत् सन्तिष्ठते।लौकिकाः पदार्थाः वर्तमानभूतभविष्यत्कालगताः सन्ति। परं रसस्तु य आनन्दमयः प्रकाशमयश्च, न कस्मिंश्चित्कालविशेषे स्वां स्थितिं निदधात्यपि तु सः सर्वकालगतः। रसस्य कार्यत्वाद् ज्ञाप्यत्वाच्च तस्य वर्तमानकालगता, न सः कार्यो न च ज्ञाप्योऽतस्तस्यावर्तमानगतत्वमपि सिद्ध्यति। रसो नित्योऽपि न, विभावादिज्ञानात् प्राक् तस्य सत्ताया एवासम्भवात्।रसौ लौकिकविषय इव न परोक्षज्ञानं नापरोक्षज्ञानम्। साक्षानन्दविषयत्वात् स न परोक्षो भवितुं सुशकः शब्दविषयत्वाच्च न सोऽपरोक्ष एव वर्तते।एतामेव मान्यतां काण्टः, शिलरः, हीगेलोऽन्ये च कतिपये तद्विषये निदधते। क्रोचे काव्यानन्दमिमं रहस्यवादिसौन्दर्यत्वेन जानाति।एतस्याध्यात्मवादिसौन्दर्यदर्शनस्य, गच्छता कालेन, प्रबलतया विरोधः उत्थितः मार्क्सः फ्रायडश्च स्वसिद्धान्तं प्रकाशयन्तौ सौन्दर्यानुभूतिं व्याख्यातवन्तौ। मार्क्समतेन कलायाः अनुभूतिरार्थिकहितानुशासितभौतिकानुभूतिरस्ति। परं फ्रायडस्य विचारेण सा कामप्रेरितेन्द्रियास्वादः। प्रतीच्यानां बुधानां कृतिषु तदनुभूतेर्हि बौद्धिक्यो नैतिक्यो मनोविज्ञानिक्यश्च व्याख्याः बभूव।काव्यानन्दः कल्पनापरक आनन्द इत्येतद् एडिसनोऽचकथत्। तन्मतेन केनचन मूलभूतवस्तुना कयाचन च कलयानुगम्यमानयोः रूपयोमर्ध्ये प्राप्यमाणस्य साम्यस्य विभावनेन यः आनन्दः उपलभ्यते स भवति कल्पनाविषयक आनन्दः। काव्यानन्दः कल्पनानन्दः एव। स तमैन्द्रियादाध्यात्मिकाच्यानन्दाद् भिन्नमेवावगच्छति।सहजानुभूतिपरक मत

वस्तुतो न स्वतन्त्रं मतम् एडिसनस्यैव कल्पनानन्दो दार्शनिकरूपत्वेन प्रस्तुतीकृतः।काव्यानन्दोऽनिर्वचनीयो विलक्षणः आनन्दः। सर्वविधेभ्यो लौकिकेभ्य आध्यात्मिकेभ्यश्चानुभवेभ्यः स भिन्नः। एतां प्राच्यपरम्परागतां मान्यतां ब्रेडले, क्लाइवो, वैलश्च कलावादिनः स्वीकुर्वन्ति।इत्थं प्रतीच्यानां विचारकाणां मतेन काव्यानन्दः ऐन्द्रियादाध्यात्मिकाच्चानुभवात् कल्पनाविषयको विलक्षण एव आनन्दः सिद्ध्यति।आलोचकमूर्धन्यस्य आई. ए. रिचर्ड्समहोदयस्य मतमुल्लेखनीयमस्ति। तद् यथापेक्षं पुष्टतरं मनोविज्ञानशास्त्रानुकूलञ्च वर्तते। तन्मतेन काव्यानन्दोऽनिर्वचनीयो विशिष्टश्चेत्येतत्कथनं न युक्त, यतो हि सानुभूतिरपि सारधारणेन्द्रियद्वारेणैव प्राप्यते। तस्माद्धेतोः काव्यानुभूतिरपि ऐन्द्रियानुभूतेर्न पृथगित्येतत् स ब्रूते।

वस्तुतस्तस्यामनुभूत्यां चित्तद्रुतिविस्तारादिकमानसिकसंवेदनास्तु घटन्त एव, एवावदेव न तत्र रोमाञ्चाश्रुवादिशारीरिक्यः संवेदनाः अपि भवन्त्येव। सत्यप्येतादृशे तथ्ये, ज्ञातव्यमिदमस्त्यत्र—लोके प्रियजनस्पर्शेणास्मच्चित्तं द्रुतिमस्मद्वपुश्च रोमाञ्च गच्छति। तद्द्रुतेः किञ्च रोमाञ्चस्यानुभूतिर्नूनं रंगमञ्चाद् वा काव्यपठनात् प्राप्ताया द्रुतेः किञ्च रोमाञ्चाद् भिन्नविधैव भवति। न तत्र तावत् प्रत्यक्षत्वं भवति न च तीव्रतम्। तत्र कस्यापि न्यूनतरन्यूनतमस्यांशस्य भिन्नतावश्यमेव भवति। काव्यानुभवस्य प्रत्यक्षघटनाजनितानुभवाभावात् सोऽनुभवस्तु भावितघटनाया अनुभवो भवति। अतः काव्यानुभूतिः साधारणेन्द्रियानुभूतिर्न सा भावितेंद्रियानुभूतिर्वर्तते।तदेवं पश्चिमीयानां विचारकाणां विचारानुसारेण एव हि काव्यानन्दो रसानुभूतिः कालदिक्कारणविशेषपरिस्थितिष्वपि घटिता भवितुं वा व्याप्तिं परिगृह्य प्रकटीभवितुं क्षमते। स्वसत्तायाः अंशेनान्यतमेन सहृदयो रसं न गृह्णाति, अपितु सर्वात्मना तमात्मसात् सः कुरुते। एतादृशतैव तन्मयतेति कथ्यते। एतस्यां तन्मयतायां वपुर्मनोऽसुबुद्धिचित्तात्मभ्यश्च स्रोतां पातयन्ति। एतेन रसस्यानुभवो विपुलो गम्भीरश्च भूत्वा समुदेति। रसोऽस्ति वस्तुत आत्मनो निर्गतिः। मनोबुद्धिचित्ताहंकारभावकल्पनाविमर्शस्मृत्यादिसकाशान्निस्यन्दं परिगृह्य स इन्द्रियाणि यावदासादितो भवति। तद्दशायां सः प्रत्यक्षतां याति।व्युत्पत्तिमाधृत्य भावस्य सामान्यतः क्रियते लक्षणमिदं—ये चेतनां व्याप्नुवन्ति ते भावा इति। भावा मनोविकारा इति मनोवेगा इति वाप्युच्यन्ते। अस्यार्थस्यापि समावेशे लक्षणमिदं स्यात्—वाह्यजगत्सम्पर्कोत्पन्नत्वे सति चेतनाव्यापक मनोविकारत्वं भावत्व'मिति। वाह्यजगत्संवेदनैर्मनुष्यहृदये ये विकारा उद्भवन्ति त एव समवेत्य भावसंज्ञा लभन्ते।पाश्चात्यमनोविज्ञाने भावविषये महान् विवादोऽस्ति। अथ चैतादृशोऽपि बहवो मनोवैज्ञानिका भावस्य स्वतन्त्रां सत्तां नांगीकुर्वन्ति। यदा प्रतिपदार्थ मनोवैज्ञानिकी शब्दावली विद्यते तदा तत्र भावसदृशस्यानपेक्षितस्य शब्दस्य समावेशेन कोऽर्थः। ममेयं भविष्यवाणी-वैज्ञानिकमनःशास्त्राद्येच्छाशक्तिशब्दः प्रायो बहिष्कृतोऽस्ति। भावशब्दस्यापीयं गतिर्भविष्यति। पञ्चाशदुत्तरैकोनविंशतिशततमे

खिष्टाब्देऽमेरिकामनोविज्ञानिनः 'अतीतस्य वैचित्र्याणि' इत्युक्त्वा अनयोर्नामनि प्रतिपादितानि।इति। विशेषज्ञानां प्रयोगशालासु यदपि स्यात्, सामान्यजीवने भावस्यास्तित्वं प्रतिषेधितुं न शक्यते, मनोविज्ञानजगत्यपि व्यवहारवादिनो वैज्ञानिकान्विहाय बहुभिस्तन्नूनमेवांगीकृतमस्ति। आम्, भावस्वरूपविषयेऽद्यापि तीव्रोऽस्ति मतभेदः। कतिपये विद्वांसस्तं केवलमनुभावं वा सहचारिणीं मनःस्थितिं वाऽनुभवविधिं वा मन्यन्ते। केचिदेतादृशोऽपि सन्ति ये तं केवलं वेगं वा, उर्जा वा वदन्ति, केषाञ्चिन्मते भावः संवेदनानां संहतिमात्रमस्ति। अन्ये च वैज्ञानिकास्तं विसंहतिरूपेण व्याचक्षते। किन्त्वनेके मनोवैज्ञानिका एतादृशोऽपि सन्ति ये भावस्य विशिष्टं रूपं तद्भेदप्रभेदानपि स्वीकुर्वन्ति। शैण्डसालस्टाउटा अंशतो मैक्डूगलोऽपि इतः जोर्गेन्सन विलियम्स बर्टादयोऽपि-वर्गस्यास्यान्तरागच्छन्ति। एतेषां वैज्ञानिका मन्तव्यं सारतस्तावदेवंविधोऽस्ति—भावाश्चेतनाया व्यवहारशीला मात्राः सन्ति—ईदृश्यः शक्तयः सन्ति, येषां निश्चितवता आधारा लक्ष्याणि च सन्ति, येषुं कर्तृत्वस्य क्षमतास्ति। यदि-वयमिमान् धर्मरूपान् मन्यामहे तदेदंशक्यं वक्तुम्, यत्ते अन्योन्याश्रिताः सन्ति, परं व्यवहारे सर्वेऽपि स्वायत्ता भवन्ति। यदि चेमांस्तत्वरूपान्मन्महे तदा माननीयं स्याद्यदिमे स्वतन्त्राः, स्वतःस्फूर्ताः सन्ति। कासुचिदाधारभूतासु मात्रासु चैते परिगणितव्याः सन्ति। यदि ते प्रत्यक्षतो दृश्येरन्, तदा ते यथार्थस्य पृष्ठभूमिकात्मना समक्षमायान्ति, यैः प्रायोगिकविधिना प्राप्तानि तथ्यानि परीक्षितुं शक्यन्ते। अयं सारांशः—प्रतिभावमेको विशिष्टगुणात्मक आधारो भवति, सोऽनन्तोऽखण्डः भवति। तेषां मिथो भिन्ना विशिष्टा वास्तविकी च सत्तास्ति परं, न ते पदार्थरूपाः।भावस्य स्वतन्त्रसत्तायां स्वीकृतायामपि तल्लक्षणकरणं न सुगमम्। जेम्सड्रेवरेण भावस्वरूपमेवमुपवर्णितम्—'भावस्य वर्णनविवचने विभिन्नैर्मनोविज्ञानिभिर्विभिन्नरीतिभिः कृते। किन्त्वत्र सर्वे सम्मताः—यत्ते जैविकविधानस्य संक्रावस्थात्मानो भवन्ति। यत्र शरीरे नानाविधा विकारा उत्पद्यन्ते, यथा श्वासक्रियायां नाड्यां ग्रन्थीनां रसनक्रियायाम्। मानसिकदृष्ट्या सोत्तेजनाया उद्वेगस्य वा स्थितिरस्ति, यत्र प्रबलानुभूतिः, सामान्यतो निश्चितप्रकारं व्यवहारं प्रति प्रवृत्तिरुत्पद्यते। इतः परं किमप्यन्यत्कथनं विवादक्षेत्रे प्रवेशाय कल्पेत। इदं भावस्वरूपस्याधुनिकविवेचनमस्ति। पूर्ववर्तिष्वपि लक्षणेषु कश्चिदनिश्चितः स्वरो विद्यते, परं तथापि तान्यधिकस्पष्टानि सन्ति, तथा वैज्ञानिकानि न स्युरिति सम्भवति। एकं सामान्य लक्षणमिदमप्यस्ति। सूत्रितयेदं शक्यं वक्तुम्—'बाह्यपरिस्थितिविशेषां संवेदस्मृतिकल्पनान्यतरस्वतन्त्रप्रत्ययोबुद्धमनोदशात्व भावत्वम्।' यस्य द्वौ मुख्यगुणौ भवतः—अनुभूतिः प्रयत्नश्चेति। स्पष्टैः शब्दैश्च डाक्टरमैक्डूगलाधारेणेदमपि शक्यतेऽभिधातुम्—अस्मत्किञ्चित्स्वाभाविकवृत्तिजागरणसमनन्तरमेव तद्वृत्त्यनुकूलं पेशीस्नायुष्वोजः सञ्चरति। इयमोजःसञ्चरणावस्थैवोत्तेजनावस्था प्रतिपरिस्थिति च

प्रत्युत्तेजनं काचिदीदृशी विशिष्टता निहिता भवति यस्या हेतोर्वयं तस्या भयक्रोधघृणादिपृथक्संज्ञाः प्रदातुमर्हामः। अत्र स्वाभाविकवृत्तिजागरणम्, उत्तेजनानिहितविशिष्टता चेत्येतद्द्वयं भावस्य मानसिकं रूपं निरूपयति। पेशीस्नायुष्वोजः-सञ्चरणञ्च तस्य शारीरिकं रूपं द्योतयति। आभ्यां मानसिकशारीरिकरूपाभ्यां सह भावस्य काश्चित्स्थितयोऽप्यनिवार्यतां बिभ्रति—

भावे विषयास्तित्वम्, भावो हि वस्तुतो वैयक्तिकं वस्तु अस्ति। विषयिणो विषये मानसिकी प्रतिक्रियेत्यर्थः।भावस्य सुखदुःखान्यतरात्मकास्वादनं स्यात्।अस्या मानसिक्याः प्रतिक्रयायां परिणामे केचित्प्रयत्ना अपि स्युः।

भावस्य शारीरिक्यभिव्यक्तिः, पेशीस्नायुपरिवृत्यात्मका विकाराश्च भवेयुः।कस्यचिदेकस्य भावस्य निरपेक्षा स्थितिर्न भवति, तत्रानेके विकारा उत्पद्येरन् इति।मनोविज्ञानपण्डितेषु भावस्य मानसिकशारीरिकरूपाणां पूर्वापरकार्यक्रममधिकृत्य भूयान् विवादः प्रचलित। जेम्समैक्डूगलप्रभृत्तयो वदन्ति यद्भावस्य मानसिकं रूपं शारीरिकरूपस्य परिणामोऽस्ति। स्टाउडादयोऽभिदधति-शारीरिक संवेदनानां कृतेऽयं क्रमोऽवश्यं वक्तव्यः, परं प्रतिभावमयं क्रमो न मन्तव्यः। तन्मते प्रायोऽनयोभविरूपयौर्विपरीतक्रम एवांगीकार्यः। आधुनिकयुगे भावप्रकल्पनान्तर्गततया स्नायविकतत्वमत्यधिकां वृद्धिं गतम्। वयं त्वस्मिन्विवादेऽनिपत्येदं वक्तुं पारयामः, यद् भारतीयदर्शने स्टाउडादिमतमेव गृहीतमस्ति। चेतनायाः पृथगस्तित्वं स्वीकुर्वतामिदमेव मतं ग्राह्यतामर्ह—संस्कृतकाव्यशास्त्रे लौकिकस्य भावस्य वर्णनं स्वाभावादेव नास्ति। तत्र तु काव्यगतानां भावानां रसव्यञ्जकानां स्थायिसञ्चारिणामेव वर्णनविवेचने स्तः। परमेते काव्यगता रसव्यञ्जका वा भावा नूनमेव चित्तवृत्तिरूपाः—'भावशब्देन तावच्चित्तवृत्तिविशेषा एव विवक्षिताः।'इति।8 चित्तवृत्याधारेण मनोविज्ञानानुसारेण च स्थायिसञ्चारिभावाः शक्यन्ते विवेचयितुम्। भरतात्पण्डितराजजगन्नाथं यावत् स्थायिसञ्चारिविवेचनं प्रायः सर्वैराचार्यैः कृतम्। अत्र प्रत्याचार्यमतपृथगुल्लेखापेक्षया सर्वविवेचनसारप्रस्तुतिर तिसमीचीना स्यात्, प्रायः सर्वमतसमानत्वदर्शनात्।स्थायिभावो वासनात्मतया। प्रमातृचित्ते तिष्ठति। कारणोपस्थितिमन्तरापि तत्सत्ता भवति। यथा पतञ्जलिनोक्तम्-चैत्रः काञ्चिदेकां प्रत्यनुरक्त इति सोऽन्यासु विरक्त इति नार्थः। अव्यक्तरूपेण तत्र रागः स्यात्। सञ्चारिणस्तु कारणानुपस्थितो निःशेषतामेव श्रयन्ते। स्थायिभावः, स्थिरा, सञ्चारिभावश्चवास्थिरा मनोदशेति भावः।जीवनमूलवृत्तिसम्बद्धतया स्थायिभावानां सम्बन्धः पुरुषार्थचतुष्टयेन सह सहजतैव स्थाप्यते। संचार्यपेक्षया स्थायिनां जीवने धर्मार्थकाममोक्षैः पुरुषार्थैरतिप्रत्यक्षः सम्बन्धो भवति। उक्तञ्च-पुमर्थोपयोगित्वेन रञ्जनाधिक्येन वा इयतामेवोपदेश्यत्वादिति। अतोऽमीषां तदपेक्षया स्थितमधिकमहत्वम्। स्थायिभावाः प्रबलतरा भवन्ति। विरुद्धा अविरुद्धा वा भावास्तं हन्तु न प्रभवन्ति। सञ्चारिणस्तु प्रतिक्षणप्राप्ताविर्भावतिरोभावाः

स्थायिभावं पुष्णन्ति।स्थाय्येव रसदशां लभते न सञ्चारी। प्रतिसहृदयहृदयं हि वासनात्मतया स्थितेः स्थायिनः साधारणीकरणं सुकरं भवति। इत्थंस्थायिभावे सञ्चार्यपेक्षया रञ्जनाधिक्यमपि सिद्धम्।मनोविज्ञाने भावानां वर्गविभाजनं नूनमिदन्तया न सम्भवति। आधुनिकी प्रवृत्तिस्तावद् वर्गीकरणविरोधिन्येव, तथापि कतिपयैरधिकारसम्पन्नैर्मनोवैज्ञानिकैः स्थूलदृशास्यां दिशि प्रयसितम्। भावानां सामान्येन त्रयो भेदाः प्रदिष्टाः—मौलिका मनोविकाराः—ये स्वतन्त्रा अमिश्रा अखण्डाश्चैव भवन्ति। यथा—भयम्।व्युत्पन्ना मनोविकाराः—अस्वतन्त्रा मनोविकारान्तरमाश्रिताश्चैव। यथा आशंकाः।मनोवृद्धिः—या मनोविकाराणां मिश्रणेन, तेषां पुनरावृत्त्या, क्रमशश्च बौद्धिकतत्वसमावेशेन निर्मितिका स्थिरा मनोदशा भवति। यथा-क्लैव्यम्।अत्रेवनवेक्षणीयम्—स्थायिभावाः सर्वथा शुद्धमनोविकारा इति न शक्यते वक्तुम्। यथा—निर्वेदः शमो वा कश्चिच्छुद्धो मनोविकारो नास्ति। एकाधिकमनोभावसम्मिश्रणेन बौद्धिकतत्वप्राधान्येन च सैका व्यवस्थिता मनोदशैवास्ति। अद्भुतरसस्थायिभावो विस्मयोऽपि स्पष्टतया मिश्रभावः। व्युत्पन्नमनोविकारप्रश्नोऽपि सर्वेषां कृते नोत्तिष्ठति। एषु हि सर्वे न व्युत्पन्नाः। भयक्रोधादयः स्फुटमेव मौलिकाः। अथशिष्टा मनोवृत्तिः,। स्थूलतया स्थायिभावो मनोवृत्त्या प्रायः समरूपः सन्नप्यन्ततस्ततो भिन्नः।समता—मनोवृत्तिवत् स्थायिभावोऽपि भावान्तरेभ्यः (सञ्चारिभ्यः) स्थायितरो भवति। मनोवृत्तिवदेव स्थायिभावोऽप्येका मनोदशा, यत्र भावान्तराणि सञ्चरन्ति।विषमता—परमुभयोः किञ्चिन्मौलिकमन्तरमपि भवति।मनोवृत्तिर्व्याप्तमनःस्थितिमात्रम्, यस्याः समग्ररूपं न जात्वनुभवनीयम्। मनोवृत्तेः सञ्चारिण एवास्वाद्या भवन्ति, न स्वयं मनोवृत्तिः। यथा—देशभक्तिरनास्वाद्या, तदाश्रिताः सञ्चारिभावा उत्साहप्रभृतय एवास्वाद्या भवन्ति। परं स्थायिभावविषयेऽन्यथाभावः, तत्र हि न केवलं सञ्चारिभावः, अपितु समग्रोऽसौ स्वयमप्यास्वाद्यो भवति। क्लैव्यन्तु मनोविकारकारणम्, न पुनः स्वयं मनोविकारः। भयन्तु स्वयमपि मनोविकार एव।मनोवृत्तिः सदैव मनोविकाराणामावृत्त्या सम्पद्यते। परं स्थायिभावविषये न सत्यमिदम्। चिन्ता सततमावर्त्यमानापि शोको न निष्पद्यते।मनोवृत्तिः सदैव विचारमूलिका, परन्तु शमवर्जं स्थायिभावः प्रवृत्तिमूलको भवति न विचारमूलकः।इत्थं स्वीकृतरूपेण तु साहित्यशास्त्रोक्तं स्थायिभावस्य स्वरूपं विवेचनञ्चाधुनिकमनोविज्ञानपरिभाषासु साम्मूयेण न घटते। तथापि तदमनोवैज्ञानिकम्। तस्याप्यस्ति स्वसंगतिः। प्रारम्भे समुपलब्धसाहित्यपर्यालोचनयोद्गमनविधिना स्थायिसञ्चारिणां वर्गीकरणं कृतं स्यात्, परं पश्चादाचार्यैर्गमीमांसादिदर्शनबलेनाव्यत्यति व्याप्त्यसम्भवदोषेभ्यो रक्षित्वाऽमीषां व्यापकत्वं साधयद्भिः स्ववर्गीकरणस्य निर्दोषत्वनिष्पत्तये सर्वथा स्तुत्यं प्रयतितम्। तेषां स्थापना अधानेन रूपेण पुरः प्रस्तोतुं शक्यन्ते।मानवहृदयोत्थायितरंगयोगेन ये विभिन्ना मनोविकाराः सम्पद्यन्ते, तेषां सङ्ख्या द्विचत्वारिंशदिति स्थितम्। एते

मनोविकाराः शुद्धमिश्रव्युत्पन्नमन्दतीव्रास्थायिस्थायिरूपैर्विभिन्नप्रकारकाः सन्ति। एषु केवला रतिहास्यशोकक्रोधोत्साहभयजुगुप्साविस्मयनिर्वेदा इति नव मनोविकाराः ईदृशः सन्ति ये भावान्तरापेक्षया स्थायितराः प्रभावसम्पन्नतराः, पुष्टत्वेन च रसपरिपाकार्हा भवन्ति। अत एवैषां महत्वविशेषः प्रदीयते। पारिभाषिकशब्दावल्याञ्च स्थायीति संज्ञा दीयते। अवंविधा रसपरिपाकार्हा भावाः सामान्यतो नवैव सन्ति। अन्य एष्वेवान्तर्भुवन्ति, यथा–दानशीलता–धर्मप्रेमादया भावास्तावदुत्साहेऽन्तर्भवन्ति (आधुनिकयुगस्य देशभक्तिराष्ट्रभावनादयोऽप्युत्साह एव) रसदशां यावद् गन्तुमसमर्थतया वा स्थायिपदाधिकारिणो न भवन्ति। यथा शास्त्रानुसारेण- वात्सल्यं देवादिविषयकरतिश्च भावावेव, न स्थायिभावो। अत्र प्रश्नद्वयमुत्तिष्ठति–

किं स्थायिसञ्चारिणोरयं भेदो मनोविज्ञानदृशा समुचितोऽस्ति। किं स्थायिभावानां नवैव, सञ्चारिभावानां च त्रयस्त्रिंशदेव संख्या सम्भवअनयोः प्रथमस्य दत्तमुत्तरम्, मनोविज्ञाने नाप्यते खल्वीदृशं वर्गविभाजनमिति, तत्र द्विविधिमेवैतदंगीक्रियते मौलिकं शुद्धम् व्युत्पन्नं चेत्येकम्, मनोविकारो मनोवृत्तिर्वेति द्वितीयम्। स्थायित्वतीव्रत्वप्रभावानाधृत्य मनोविज्ञानं न वर्गीकरोति। मनोविज्ञानं हि विज्ञानम्। यदुपयुक्तानुपयुक्तसुन्दरसाध्व- साधुतीव्रमन्दाद्युपाध्यारेण वर्गीकरणं न करोति। तथापि जीवनेऽस्त्येवैतादृशो भेदः एवंविधं च विभाजनं, भविष्यत्यपि च। विज्ञानं नात्र प्रपञ्चे निपतति, एतस्य तत्परिधिबहिर्गतत्वात्। परं यदा जीवनगतोपयुक्तता विचार्यते तदास्य निषेधो दुष्करो भवति इत्थमेव भावक्षेत्रेऽप्येको भावो भावान्तरात्स्वस्थतरो मृदुतरश्च भवति, तीव्रतरः स्थायितरः प्रभावसम्पन्नतरो वेति नैतदंगीकर्तुं दुष्करम्। मनोविज्ञानमिदं न विवेचयति। साहित्येतु जीवनगतोपयुक्तान्वितस्यास्य वर्गीकरणस्य नास्ति सर्वथाऽऽस्वाभाविकत्वम्। आचार्यरामचन्द्रशुक्लेन नैतिकमूल्याधारेण स्थायिभावानामौचित्यविधानं कृतम्। साप्येका दृष्टिः परं ततो व्यापकतरयापि दृष्ट्यैतत् शक्यते समाधातुम्। यथा–चिन्तायाः शोकस्तीव्रतरः, चिन्तायास्तीव्रतमं चित्रणं शोकस्य तीव्रतमाच्चित्रणाच्छिथिलमेव स्यात्। तथैव चिन्तापेक्षया शोके स्थायितरत्वमपि स्पष्टम्। शोके चिन्ता निमज्जयते न तु चिन्तायां चिन्तया शोकः शोको वस्तुतः एव व्यापकतरः। तीव्रतरः स्थायितरो व्यापकतरश्च भावो नियमेन प्रभावसम्पन्नतरोऽपि स्यात्। इदमेव गर्वोत्साहयोः, शंकाभययोस्तथाविध-योश्चान्ययोर्भावयोरपि गतिः। यद्यप्याधुनिके मनोविज्ञाने विभाजनमीदृशं न दृश्यते, तथापीदं मिथ्याऽमनोवैज्ञानिकं वेति न सुवचम्। स्थायिभावत्वे स्थितिर्वस्तुतो जीवनस्य तेषां नैसर्गिकतीव्रत्यापक मनोविकाराणामस्ति ये मानवस्वभावस्याधारायितान्यंगानि सन्ति, ये च सामान्येन मानवात्मनो मूलमनोवेगा इत्युच्यन्ते। एषां मनोवेगानां साक्षात्सम्बन्धो मानवात्मनो मूलभूताभ्यां गुणाभ्यां रागद्वेषाभ्यां सहास्ति आत्मनः प्राथमिक्यभिव्यक्तिः-अस्मिता-अहंकारो वास्ति। यस्यामद्यतनेन मनोविश्लेषणेनाहंरूपताया निर्विरोधं स्वीकारः क्रियते।

अहंकाराभिव्यक्तेर्द्वेसरणी स्तः—रागो द्वेषश्च, ये मानवजीवनस्य द्वयींमौलिकानुभवयोः-सुखदुःखयोः-शास्त्रीयपर्यायमात्रे स्तः-'सुखाद् रागः, दुःखाद्द्वेषः—इति। आधुनिके मनोविश्लेषणशास्त्रे इमे एव प्रेमप्रवृत्ति—नाशप्रवृत्तिनामभ्यां स्त्रियेते। गम्भीरविमर्शे तु फ्रायडस्य कामो मूलतो रागः, ऐडलरस्य च हीनभावो द्वेष एवेति सिध्यति। आधुनिकमनोविश्लेषकाणामत्रक त्रीणि मतानि भवन्ति—यत्र काम एव जीवनमूलवृत्तिरिति फ्रायडः, हीनभावः क्षतिपूर्तिर्र्वेयिडलरः, जीवनेच्छेति च युंगो मन्यते। अस्माकं शब्दावल्याम्—'अस्मिताया इमाः शाखा इति मन्यमानो युंगस्ताम्—'अस्मिताम्'-एव मूलं मन्यते। अथायमेव जिजीविषा सिद्धान्तः सामान्येन स्वीक्रियते।उत्तमाधमेषु पात्रेषु राग एव प्रश्रयप्रेमकरुणानां रूपाणि धारयति। द्वेषश्च भयक्रोधघृणानाम्। इत्थंभावजगद् विस्तीर्यते। यथा डाक्टरभगवानदासेनातिमौलिक्या शैल्या प्रदर्शितम्, संस्कृतसाहित्ये सर्वे स्थायिभावाः अनयोर्मूलभावयोरन्तः समाविशन्ति। रतिहासोत्साहविस्मया सामान्येनास्मितोपकारकतया रागे, शोकक्रोधभयजुगुप्साश्च तदपकारकतया द्वेषे समाविशन्ति। शमेऽनयोः सामञ्जस्यं, शमो ह्यस्मितायाः सामरस्यम् समरसावस्था। पूर्वे चत्वारो भावा मधुरतया सुखस्याभिव्यक्तयः, परे च कटुतया दुःखस्य। शमे तूभयोः समन्वयः। अनपेक्षितवचनमिदम्, यथैतद्विभाजनं नास्ति निर्दोषम्। तत्वतो हि न काचिदपि प्रवृत्तिः शुद्धरागमयी वा न भवति। वस्तुतो यथा मनोविश्लेषकाः वदन्ति—तथा रागद्वेषयोः संघर्षणैवास्माकं मानसिकं जीवनं सञ्चाल्यते। अतो यद्युत्साहस्य युयुत्सायां द्वेषांशो दृश्यते, शोके रागांशस्तदा न विस्मेतव्यम्। वस्तुतस्तु रतिरपि न शुद्धरागात्मिका।

संदर्भग्रंथाः-------


1-चिन्तामणि निबंध संग्रहः आचार्यरामचन्द्रशुक्ल
2-साहित्यदर्पण :: तृतीयपरिच्छेद
3-नाट्यदर्पण :: रामचन्द्रगुणचन्द्र 2:3
4-साहित्यदर्पणम् :: 3:28
5-साहित्यदर्पणम् :: 3:20-29
6-भरतमुनिः नाट्यशास्त्र रसप्रकरण
7-काव्यप्रकाश :: चतुर्थउल्लास
8-अभिनवभारती :: पृष्ठ-480
9-रहेटरिक :: बेसिकवर्क्स आफ अरिस्टोटिल्स-रिचर्डमैकओल-पृष्ठ-1380
10-इन्सटिंक्ट इन मैन दि कन्टेम्परेरी थिअरी आफ इन्सटिन्क्ट्स::पृष्ठ-310